সাংখ্যাস্তু সর্ব্বমপি কর্ম্ম বন্ধকত্বান্ন কার্য্যমিত্যাহুঃ তন্নিরাকুর্ব্বন্নাহ যজ্ঞার্থাদিত্যাদি। যজ্ঞোঽত্র বিষ্ণুঃ যজ্ঞো বৈ বিষ্ণুরিতি শ্রুতেঃ। তদারাধনার্থাৎ কর্ম্মণঃ অন্যত্র তদেকং বিনা অয়ং লোকঃ কর্ম্মবন্ধনঃ কর্ম্মভি-
র্ব্বধ্যতে ন ত্বীশ্বরারাধনার্থেন। অতস্তদারাধনার্থং বিষ্ণুপ্রীত্যর্থং কর্ম্ম মুক্তসঙ্গঃ নিষ্কামঃ সন্ সমাচর ॥ ৯ ॥ প্রজাপতিবচনাদপি কর্ম্মকর্ত্তৃঃ শ্রেষ্ঠত্বমিত্যাহ সহযজ্ঞা ইতি ত্রিভিঃ। যজ্ঞেন সহ বর্ত্তন্তে ইতি সহ-
যজ্ঞাঃ যজ্ঞাধিকৃতা ব্রাহ্মণাদ্যাঃ প্রজাঃ পুরা সর্গাদৌ সৃষ্ট্বা ইদমুবাচ ব্রহ্মা। অনেন যজ্ঞেন প্রসবিষ্যধ্বং প্রসবঃ উত্তরোত্তরাভিবৃদ্ধিঃ তাং লভধ্বমিত্যর্থঃ। তত্র হেতুঃ এষ যজ্ঞো বো যুষ্মাকমিষ্টকামধুক্ অভী-
ষ্টকামান্ দোগ্ধীতি তথা অভীষ্টভোগপ্রদোঽস্ত্বিত্যর্থঃ। অত্র চ যজ্ঞগ্রহণমাবশ্যককর্ম্মোপলক্ষণার্থং কাম্যকর্ম্মপ্রশংসা তু প্রকরণেঽসঙ্গতাপি সামান্যতঃ অকর্ম্মণঃ কর্ম্ম শ্রেষ্ঠমিত্যেতদর্থমিতি দ্র-

যজ্ঞার্থাৎ কর্ম্মণোঽন্যত্র লোকোঽয়ং কর্ম্মবন্ধনঃ। তদর্থং কর্ম্ম কৌন্তেয় মুক্তসঙ্গঃ সমাচর ॥ ৯ ॥ সহযজ্ঞাঃ প্রজাঃ সৃষ্ট্বা পুরোবাচ প্রজাপতিঃ। অনেন প্রসবি-
ষ্যধ্বমেষ বোঽস্ত্বিষ্টকামধুক্ ॥ ১০ ॥ দেবান্ ভাবয়তানেন তে দেবা ভাবয়ন্তু বঃ। পরস্পরং ভাবয়ন্তঃ শ্রেয়ঃ পরমবাপ্স্যথ ॥ ১১ ॥
গী ১৪ ইষ্টান্ ভোগান্ হি বো দেবা দাস্যন্তে যজ্ঞভাবিতাঃ। তৈর্দত্তানপ্রদায়ৈভ্যো যো ভুঙ্ক্তে স্তেন এব সঃ ॥ ১২ ॥ যজ্ঞশিষ্টাশিনঃ সন্তো মুচ্যন্তে
সর্ব্বকিল্বিষৈঃ। ভুঞ্জতে তে ত্বঘং পাপা যে পচন্ত্যাত্মকারণাৎ ॥ ১৩ ॥ ১৩ ॥

ষ্টঃ ॥ ১০ ॥ কথমিষ্টকামদোগ্ধা যজ্ঞো ভবেদিত্যাহ দেবানিত্যাদি। অনেন যজ্ঞেন যূয়ং দেবান্ ভাবয়ত হবির্ভাগৈঃ সম্বর্দ্ধয়ত। তে চ দেবা যুষ্মান্ সম্বর্দ্ধয়ন্তু বৃষ্ট্যাদিনা অন্নোৎপত্তিদ্বারেণ। এবমন্যোন্যং সম্বর্দ্ধয়-
ন্তো দেবা যূয়ঞ্চ পরং শ্রেয়ঃ অভীষ্টমর্থং প্রাপ্স্যথ ॥ ১১ ॥ এতদেব স্পষ্টীকুর্ব্বন্ কর্ম্মাকরণে দোষমাহ ইষ্টানিত্যাদি। যজ্ঞৈর্ভাবিতা দেবা বৃষ্ট্যাদিদ্বারা যুষ্মভ্যং ভোগান্ দাস্যন্তি। হি যতো দেবৈর্দত্তানন্নাদীন্ এভ্যো
দেবেভ্যঃ পঞ্চযজ্ঞাদিভিরদত্ত্বা যো ভুঙ্ক্তে স স্তেন এব চৌর এব জ্ঞেয়ঃ ॥ ১২ ॥ অতশ্চ যজন্ত এব শ্রেষ্ঠা নেতর ইত্যাহ যজ্ঞশিষ্টাশিন ইত্যাদি। বৈশ্বদেবাদিযজ্ঞাবশিষ্টং যে অশ্নন্তি তে পঞ্চসূনাকৃতৈঃ সর্ব্বৈঃ কিল্বিষৈর্মুচ্যন্তে। প-
ঞ্চসূনাঃ স্মৃতাবুক্তাঃ কণ্ডনী পেষণী চুল্লী উদকুম্ভী চ মার্জ্জনী। পঞ্চসূনা গৃহস্থস্য তাভিঃ স্বর্গং ন গচ্ছতীতি। যে তু আত্মনো ভোজনার্থমেব পচন্তি ন তু বৈশ্বদেবাদ্যর্থং তে পাপা দুরাচারা অঘমেব ভুঞ্জতে ॥ ১৩ ॥

জগচ্চক্রপ্রবৃত্তিহেতুত্বাদপি : কর্ম্মকর্ত্তব্যমিত্যাহ অন্নাদিতি : অন্নাৎ শুক্রশোণিতপরিণতাৎ ভূতান্যুৎপদ্যন্তে : অন্নস্য সম্ভবঃ পর্জ্জন্যাৎ বৃষ্টেঃ : স চ পর্জ্জন্যো যজ্ঞাদ্ভবতি : স চ যজ্ঞঃ কর্ম্মসমুদ্ভবঃ : কর্ম্মণা যজমানাদিব্যাপারেণ : সম্যক্ নিষ্পাদ্যত ইত্যর্থঃ : অগ্নৌ প্রাস্তাহুতিঃ সম্যগাদিত্যমুপতিষ্ঠতে । আদিত্যাজ্জায়তে বৃষ্টির্বৃষ্টেরন্নং ততঃ প্রজা ইতি স্মৃতেঃ ॥ তচ্চ কর্ম্মেত্যাদি তচ্চ যজমানাদিব্যাপাররূপং কর্ম্ম ব্রহ্মোদ্ভবং বিদ্ধি : ব্রহ্ম বেদস্তস্মাৎ প্রবৃত্তং জানীহি : তচ্চ ব্রহ্ম বেদাখ্যং অক্ষরাৎ পরব্রহ্মণঃ সমুদ্ভূতং বিদ্ধি : অস্য মহতো ভূতস্য নিশ্বসিতমেতদৃগ্বেদো যজুর্ব্বেদঃ সামবেদ ইতি শ্রুতেঃ : অতএবাক্ষরাদেব : যজ্ঞপ্রবৃত্তেরবগন্তব্যমস্যাভিপ্রেতো যজ্ঞঃ তস্মাৎ সর্ব্বগতমপ্যক্ষরং ব্রহ্ম নিত্যং সর্ব্বদা যজ্ঞে প্রতিষ্ঠিতং : যজ্ঞেনোপায়ভূতেন প্রাপ্যত ইতি যজ্ঞে প্রতিষ্ঠিতমুচ্যতে উদ্যোগস্থা সদানন্দী বৃত্তিবৎ : যদ্বা য

অন্নাদ্ভবন্তি ভূতানি পর্জ্জন্যাদন্নসম্ভবঃ । যজ্ঞাদ্ভবতি পর্জ্জন্যো যজ্ঞঃ কর্ম্মসমুদ্ভবঃ ॥ ১৪ ॥ কর্ম্ম ব্রহ্মোদ্ভবং বিদ্ধি ব্র

হ্মাক্ষরসমুদ্ভবং । তস্মাৎ সর্ব্বগতং ব্রহ্ম নিত্যং যজ্ঞে প্রতিষ্ঠিতং ॥ ১৫ ॥ এবং প্রবর্ত্তিতং

চক্রং নানুবর্ত্তয়তীহ যঃ । অঘায়ুরিন্দ্রিয়ারামো মোঘং পার্থ স জীবতি ॥ ১৬ ॥ যস্ত্বা

ত্মরতিরেব স্যাৎ আত্মতৃপ্তশ্চ মানবঃ । আত্মন্যেব চ সন্তুষ্টস্তস্য কার্য্যং ন বিদ্যতে ॥ ১৭ ॥

স্যাজ্জগচ্চক্রস্য মূলং কর্ম্ম তস্মাৎ সর্ব্বগতং : মন্ত্রার্থবাদৈঃ সর্ব্বেষু স্থানাদিষু গতং স্থিতমপি : বেদাখ্যং ব্রহ্ম সর্ব্বদা যজ্ঞে তাৎপর্য্যেণ প্রতিষ্ঠিতং : অতো যজ্ঞাদিকর্ম্মকর্ত্তব্যমিত্যর্থঃ ॥ ১৫ ॥ যস্মাদেবং পরমেশ্বরেণৈব প্রবর্ত্তিতমেতদ্ভূতানাং প্রকৃত্যার্থসিদ্ধয়ে : কর্ম্মাদিচক্রং প্রবর্ত্তিতং তস্মাত্তদকুর্ব্বতো বৃথা জীবিতমিত্যাহ এবমিত্যাদি : পরমেশ্বরবাক্যভূতাৎ বেদাখ্যাদ্ব্রহ্মণঃ পুরুষাণাং কর্ম্মণি প্রবৃত্তিঃ ততঃ কর্ম্মনিষ্পত্তিঃ ততঃ পর্জ্জন্যঃ ততোঽন্নং ততো ভূতানি : ভূতানাং পুনস্তথৈব কর্ম্মপ্রবৃত্তিরিত্যেবং প্রবর্ত্তিতং চক্রং যো নানুবর্ত্ততে : অঘং পাপমায়ুর্যস্য সঃ : যত ইন্দ্রিয়ৈর্বিষয়েষ্বারামতি নত্বীশ্বরারাধনার্থে কর্ম্মণি : অতো মোঘং ব্যর্থং জীবতি সঃ ॥ ১৬ ॥ তদেবং ন কর্ম্মণামনারম্ভাদিত্যাদিনা অজ্ঞং প্রতি কর্ম্মশুদ্ধ্যর্থং কর্ম্মযোগমুক্ত্বা জ্ঞানিনঃ কর্ম্মানুপযোগমাহ যস্ত্বিতি দ্বাভ্যাং । আত্মন্যেব রতিঃ প্রীতির্যস্য তথাত্মন্যেব তৃপ্তঃ : স্বানন্দানুভবেন নির্বৃতঃ অতএবাত্মন্যেব সন্তুষ্টো ভোগাপেক্ষারহিতো যঃ তস্য কর্ত্তব্যং নাস্তি

অহেতুমাহ নৈবেত্যাদি। কৃতেন কর্ম্মণা তস্যার্থঃ পুণ্যং নাস্তি। নচাকৃতেন কশ্চন কোপি প্রত্যবায়োস্তি। নিরহঙ্কারত্বেন বিধিনিষেধাতীতত্বাৎ। তথাপি তদেষাং দেবানাং ন প্রিয়ং যদেতন্মনুষ্যা বিদুরিতি শ্রুতেঃ
মোক্ষে দেবকৃতবিঘ্নসম্ভাবনাপরিহারার্থং কর্ম্মভির্দ্দেবাঃ সেব্যা ইত্যাশঙ্ক্যাহ নচাস্যেতি। সর্ব্বভূতেষু ব্রহ্মাদিস্থাবরান্তেষু কশ্চিদপ্যর্থব্যপাশ্রয়ঃ। আশ্রয় এব ব্যপাশ্রয়ঃ। অর্থে মোক্ষে আশ্রয়ণীয়োস্তীতি যেন বিঘ্না
ভাবসম্ভবেনোক্তত্বাৎ। তথাচ শ্রুতিঃ। তস্য হ ন দেবাশ্চ নাভূত্যা ঈশতে। আত্মা হ্যেষাং স ভবতীতি। নেশতে ন শক্তা ইত্যর্থঃ। দেবা অপি তস্যামৃতত্বস্য প্রাপ্ত্যৈ ব্রহ্মভাবপ্রতিবন্ধায় নেশতে ন শক্নুবন্তীত্যর্থঃ। দেব
কৃতাস্তু বিঘ্নাঃ সম্যক্‌জ্ঞানোৎপত্তেঃ প্রাগেব। যদেতদ্ব্রহ্ম মনুষ্যা বিদুস্তদেষাং দেবানাং ন প্রিয়মিতি ব্রহ্মজ্ঞানস্যৈবাপ্রিয়ত্বোক্ত্যা তত্রৈব বিঘ্নকর্ত্তৃত্বসূচনাৎ॥১৮॥ যস্মাদেবং তস্মাত্ত্বমজ্ঞানিনস্তব কর্ম্মাণ্যনুপযোগো

নৈব তস্য কৃতেনার্থো নাকৃতেনেহ কশ্চন। নচাস্য সর্ব্বভূতেষু কশ্চিদর্থব্যপা শ্রয়ঃ॥১৮॥ তস্মাদসক্তঃ সততং কার্য্যং কর্ম্ম সমাচর। অসক্তো হ্যাচরন্ কর্ম্ম
শ্রী ১৩ পরমাপ্নোতি পূরুষঃ॥১৯॥ কর্ম্মণৈব হি সংসিদ্ধিমাস্থিতা জনকাদয়ঃ। লোকসংগ্রহমেবাপি সম্পশ্যন্ কর্ত্তুমর্হসি॥২০॥ যদ্যদাচরতি শ্রেষ্ঠস্ত
ত্তদেবেতরো জনঃ। স যৎ প্রমাণং কুরুতে লোকস্ত দনুবর্ত্ততে॥ ॥২১॥

নান্যস্য তস্মাত্ত্বং কর্ম্ম কুর্ব্বিত্যাহ তস্মাদিতি। অসক্তঃ ফলসঙ্গরহিতঃ সন্ কার্য্যমবশ্যং কর্ত্তব্যতয়া বিহিতং নিত্যনৈমিত্তিকং কর্ম্ম সম্যগাচর। হি যস্মাদসক্তঃ কর্ম্মাচরন্ পুরুষঃ পরং মোক্ষং চিত্তশুদ্ধিজ্ঞানদ্বারা প্রা
প্নোতি॥১৯॥ অত্র সদাচারং প্রমাণয়তি কর্ম্মণৈবেতি। কর্ম্মণৈব শুদ্ধসত্ত্বাঃ সন্তঃ সংসিদ্ধিং সম্যক্‌জ্ঞানং প্রাপ্তা ইত্যর্থঃ। যদ্যপি ত্বং সম্যক্‌জ্ঞানিনমেবাত্মানং মন্যসে তথাপি কর্ম্মাচরণং ভদ্রমেবেত্যাহ লোকসংগ্রহমিত্যাদি
লোকস্য সংগ্রহঃ স্বধর্ম্মে প্রবর্ত্তনং ময়া কর্ম্মনিকৃতে জনঃ সর্ব্বোপি করিষ্যতি। অন্যথা অজ্ঞানিকৃতাদিনেন স্যাত্তঃ কর্ম্মত্যজন্ পতেদিত্যেবং লোকরক্ষণমপি তাবৎ প্রয়োজনং সম্পশ্যন্ কর্ম্ম কর্ত্তুমেবার্হসি। নত্যক্তুমিত্যর্থঃ॥২০॥
কর্ম্মকরণে লোকসংগ্রহো যথা স্যাত্তদাহ। যদ্যদিত্যাদি। ইতরঃ প্রাকৃতো জনোপি তত্তদেবাচরতি। স শ্রেষ্ঠো জনঃ কর্ম্মশাস্ত্রং তন্নিবৃত্তিশাস্ত্রং বা যৎপ্রমাণং মন্যতে তদেব লোকোপ্যনুসরতি॥ ২১ ॥

অত্র চাহমেব দৃষ্টান্ত ইত্যাহ । ন মে ইতি ত্রিভিঃ । হে পার্থ মে কর্ত্তব্যং নাস্তি । যতস্ত্রিষ্বপি লোকেষ্বপ্রাপ্তং সৎ প্রাপ্তব্যং নাস্তি । তথাপি কর্ম্মণি বর্ত্ত এব কর্ম্ম করোম্যেবেত্যর্থঃ ॥২২॥ অকরণে লোকস্য নাশং দর্শয়তি যদীতি
জাতু কদাচিৎ অতন্দ্রিতোঽনলসঃ সন্ যদি কর্ম্মণি ন বর্ত্তেয়ং তর্হি মমৈব বর্ত্ম মার্গং মনুষ্যা অনুবর্ত্তন্তে অনুবর্ত্তেরন্নিত্যর্থঃ ॥২৩॥ ততঃ কিমত আহ উৎসীদেয়ুরিতি । উৎসীদেয়ুঃ স্বধর্ম্মানাচরণেন নশ্যেয়ুঃ । ততশ্চ যো বর্ণসঙ্ক
রো ভবেত্তস্যাপ্যহমেব কর্ত্তা স্যাং ভবেয়ং । এবমহমেব প্রজা উপহন্যাং মলিনীঃ কুর্য্যাং ॥২৪॥ তস্মাদাত্মবিদাপি লোকসংগ্রহার্থং তৎকৃপয়া কর্ম্ম কার্য্যমেবেত্যুপসংহরতি সক্তা ইতি । কর্ম্মণি সক্তা অভিনি
বিষ্টাঃ সন্তোঽজ্ঞা যথা কর্ম্ম কুর্ব্বন্তি অসক্তঃ সন্ বিদ্বানপি তথৈব কুর্য্যাৎ লোকসংগ্রহমিচ্ছুঃ ॥২৫॥ ননু কৃপয়া তত্ত্বজ্ঞানমেবোপদেষ্টুং যুক্তং নেত্যাহ ন বুদ্ধিভেদমিতি । অজ্ঞানামত এব কর্ম্মসঙ্গিনাম

ন মে পার্থাস্তি কর্ত্তব্যং ত্রিষু লোকেষু কিঞ্চন । নানবাপ্তমবাপ্তব্যং বর্ত্ত এব চ কর্ম্মণি ॥২২॥ যদি হ্যহং ন বর্ত্তেয়ং জাতু কর্ম্মণ্যতন্দ্রিতঃ । মম বর্ত্মানু
বর্ত্তন্তে মনুষ্যাঃ পার্থ সর্ব্বশঃ ॥২৩॥ উৎসীদেয়ুরিমে লোকা ন কুর্য্যাং কর্ম্ম চেদহং । সঙ্করস্য চ কর্ত্তা স্যামুপহন্যামিমাঃ প্রজাঃ ॥২৪॥ সক্তাঃ
কর্ম্মণ্যবিদ্বাংসো যথা কুর্ব্বন্তি ভারত । কুর্য্যাদ্বিদ্বাংস্তথাসক্তশ্চিকীর্ষুর্লোকসংগ্রহং ॥২৫॥ ন বুদ্ধিভেদং জনয়েদজ্ঞানাং কর্ম্মসঙ্গিনাং । যোজয়েৎ
সর্ব্বকর্ম্মাণি বিদ্বান্ যুক্তঃ সমাচরন্ ॥২৬॥ প্রকৃতেঃ ক্রিয়মাণানি গুণৈঃ কর্ম্মাণি সর্ব্বশঃ । অহঙ্কারবিমূঢাত্মা কর্ত্তাহমিতি মন্যতে ॥২৭॥

কর্ত্তৃত্বোপদেশেন বুদ্ধিভেদং ন জনয়েৎ কর্ম্মণঃ সকাশাদ্বুদ্ধিচালনং ন কুর্য্যাৎ । অপি তু যোজয়েৎ সেবয়েৎ কর্ম্মসু যুক্তো হ্যবহিতঃ স্বয়মাচরন্ বুদ্ধিচালনে কৃতে কর্ম্মসু শ্রদ্ধানিবৃত্তেঃ তেষামু
ভয়ভ্রংশঃ স্যাদিতি ভাবঃ ॥২৬॥ ননু বিদুষাপি কর্ম্ম কর্ত্তব্যং চেৎ তর্হি বিদ্বদবিদুষোঃ কো বিশেষঃ ইত্যাশঙ্ক্য তয়োর্বিশেষং দর্শয়তি । প্রকৃতেরিতি দ্বাভ্যাং প্রকৃতের্গুণৈঃ প্রকৃতি
কার্য্যৈরিন্দ্রিয়ৈঃ সর্ব্বপ্রকারেণ ক্রিয়মাণানি কর্ম্মাণি তান্যহমেব কর্ত্তা করোমীতি মন্যতে । অহঙ্কারেণ ইন্দ্রিয়াদিষ্বাত্মাধ্যাসেন বিমূঢবুদ্ধিঃ সন্ ॥২৭॥

জ্ঞানযোগপত্র ৪ ॥৩

বিদ্বাংস্তথা নমন্যতে ইত্যাহ তত্ত্ববিদিতি : নাহং গুনাত্মক ইতি : গুনেভ্য আত্মনো বিভাগঃ : নমে কর্ম্মানীতি : কর্ম্মভ্যো প্যাত্মনো বিভাগঃ : তয়োর্গুনকর্ম্মবিভাগয়োর্যস্তত্ত্বং বেত্তি স তু ন সজ্জতে : কর্ত্তৃত্বাভি-
নিবেশং ন করোতি : তত্র হেতুঃ গুনা ইন্দ্রিয়ানি গুনেষু প্রবর্ত্তন্তে নাহমিতি মত্বা ॥ ২৮ ॥ নবুদ্ধিভেদমিত্যুক্তমুপসংহরতি প্রকৃতেরিতি : প্রকৃতের্গুনৈঃ সত্ত্বাদিভিঃ সংমূঢাঃ সন্তো গুনেষু ইন্দ্রিয়েষু তৎ-
কর্ম্মসু চ সজ্জন্তে তানকৃৎস্নবিদঃ মন্দমতীন্ কৃৎস্নবিৎ সর্ব্বজ্ঞো ন বিচালয়েৎ ॥ ২৯ ॥ তদেবং তত্ত্ববিদাপি কর্ম্ম কর্ত্তব্যং মুমুক্ষুনাপি তত্ত্ববিৎ : কথং কর্ম্ম কর্ত্তব্যমিত্যাহ : ময়ীতি : সর্ব্বানি কর্ম্মা-
নি ময়ি সংন্যস্য সমর্প্য : অধ্যাত্মচেতসা : অন্তর্য্যাম্যধীনোহং কর্ম্ম করোমি ইতি দৃষ্ট্যা নিরাশী র্নিষ্কামঃ সন্ : অত এব মৎ ফলসাধনং মদর্থমিদং কর্ম্ম ইত্যেবং মমতাশূন্যশ্চ ভূত্বা : বিগতজ্বরঃ য-

তত্ত্ববিত্তু মহাবাহো গুনকর্ম্মবিভাগয়োঃ । গুনা গুনেষু বর্ত্তন্তে ইতি মত্বা ন সজ্জতে ॥ ২৮ ॥ প্রকৃতের্গুনসম্মূঢাঃ সজ্জন্তে গুনকর্ম্মসু ।
তানকৃৎস্নবিদো মন্দান্ কৃৎস্নবিন্ন বিচালয়েৎ ॥ ২৯ ॥ ময়ি সর্ব্বানি কর্ম্মানি সংন্যস্যাধ্যাত্মচেতসা । নিরাশীর্নির্ম্মমো ভূত্বা যুধ্যস্ব বিগতজ্বরঃ ॥
গী ৬ ॥ ৩০ ॥ যে মে মতমিদং নিত্যমনুতিষ্ঠন্তি মানবাঃ । শ্রদ্ধাবন্তোহনসূয়ন্তো মুচ্যন্তে তেপি কর্ম্মভিঃ ॥ ৩১ ॥ যে ত্বেতদভ্যসূয়ন্তো নানুতিষ্ঠন্তি মে মতং । সর্ব্বজ্ঞানবি-
মূঢাংস্তান্ বিদ্ধি নষ্টানচেতসঃ ॥ ৩২ ॥ সদৃশং চেষ্টতে স্বস্যাঃ প্রকৃতের্জ্ঞানবানপি । প্রকৃতিং যান্তি ভূতানি নিগ্রহঃ কিং করিষ্যতি ॥ ৩৩ ॥

জ্বশোকো ভূত্বা যুধ্যস্ব ॥ ৩০ ॥ এবং কর্ম্মানুষ্ঠানে গুনমাহ : যে মে ইত্যাদি : মত্তো যে শ্রদ্ধাবন্তঃ অনসূয়ন্তো দুঃখাত্মকে কর্ম্মনি প্রবর্ত্তয়তীতি দোষদৃষ্টিমকুর্ব্বন্তঃ যে মদীয়ং মতমনুতিষ্ঠন্তি : তেপি সনৈঃ
সম্যগ্জ্ঞানিবৎ : কর্ম্মভির্মুচ্যন্তে ॥ ৩১ ॥ বিপক্ষে দোষমাহ যে ত্বিতি : যে তু নানুতিষ্ঠন্তি তান্ অচেতসঃ বিবেকশূন্যান্ : অত এব সর্ব্বস্মিন্ কর্ম্মনি ব্রহ্মবিষয়ে যজ্জ্ঞানং তত্র বিমূঢান্ নষ্টান্ বিদ্ধি ॥ ৩২ ॥
ননু তর্হি মহাফলত্বাদিন্দ্রিয়ানি নিগৃহ্য নিষ্কামাঃ সন্তঃ সর্ব্বেপি স্বধর্ম্মমেব কিং নানুতিষ্ঠন্তি অত আহ সদৃশমিতি : প্রকৃতিঃ প্রাচীনকর্ম্মাধীনঃ স্বভাবঃ স্বস্যাঃ স্বকীয়ায়াঃ প্রকৃতেঃ স্বভাবস্য সদৃশমনুরূপমেব
জ্ঞানবানপি চেষ্টতে ইতি : কিং পুনর্ব্বক্তব্যমজ্ঞশ্চেষ্টত ইতি : যস্মাদ্ভূতানি সর্ব্বেপি প্রানিনঃ প্রকৃতিং যান্তি অনুবর্ত্তন্তে এবঞ্চ সতি ইন্দ্রিয়নিগ্রহঃ কিং করিষ্যতি প্রকৃতের্বলীয়স্ত্বাদিত্যর্থঃ ॥ ৩৩ ॥

নন্বেবং প্রকৃত্যধীনৈব চেৎ পুরুষস্য প্রবৃত্তিস্তর্হি বিধিনিষেধয়োর্বৈয়র্থ্যং প্রাপ্তমিত্যাশঙ্ক্যাহ : ইন্দ্রিয়স্যেতি : ইন্দ্রিয়স্যেন্দ্রিয়স্যেতি : বীপ্সায়াং প্রত্যেকং সর্ব্বেষামিন্দ্রিয়াণামিত্যুক্তং : অর্থে স্বস্ববিষয়ে অনুকূ-
লে রাগঃ প্রতিকূলে দ্বেষ ইত্যেবং রাগদ্বেষৌ ব্যবস্থিতৌ : অবশ্যংভাবিনৌ ততশ্চ তদনুরূপা প্রবৃত্তিরিতি : ভূতানাং প্রকৃতিস্তথাপি তয়োর্বশবর্ত্তী ন ভবেদিতি শাস্ত্রেণ নিয়ম্যতে : হি যস্মাদস্য মুমুক্ষো-
স্তৌ পরিপন্থিনৌ প্রতিপক্ষৌ : অয়ম্ভাবঃ বিষয়স্মরণাদিনা রাগদ্বেষাবুৎপাদ্য নরস্থিতং জ্ঞানং হৃত্বা পুরুষমনর্থেপি গম্ভীরস্রোতস্তীর প্রকৃতির্যথা প্রবর্ত্তয়তি : শাস্ত্রন্তু ততঃ প্রাগেব বিষয়েষু প্র-
বর্ত্তয়িত্বা রাগদ্বেষপ্রতিবন্ধকে পরমেশ্বরভজনাদৌ প্রবর্ত্তয়তি ততশ্চ গম্ভীরস্রোতঃপাতাৎ : পূর্ব্বমেব নাবমাশ্রিতস্তীর নানর্থং প্রাপ্নোতি ॥৩৪॥ তদেবং স্বাভাবিকীং পশ্বাদিসদৃশীং প্রবৃত্তিং ত্য-

ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থে রাগদ্বেষৌ ব্যবস্থিতৌ । তয়োর্ন বশমাগচ্ছেত্তৌ হ্যস্য পরিপন্থিনৌ ॥৩৪॥ শ্রেয়ান্ স্ব-
ধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ । স্বধর্ম্মে নিধনং শ্রেয়ঃ পরধর্ম্মো ভয়াবহঃ ॥ ৩৫ ॥ অর্জ্জুন উবাচ ॥
অথ কেন প্রযুক্তোঽয়ং পাপং চরতি পূরুষঃ । অনিচ্ছন্নপি বার্ষ্ণেয় বলাদিব নিয়োজিতঃ ॥ ৩৬ ॥ শ্রীভগবানুবাচ ॥

ত্বা ধর্ম্মে প্রবর্ত্তিতব্যমিত্যুক্তং । তর্হি স্বধর্ম্মস্য যুদ্ধাদের্দুঃখরূপস্য যথাবৎ কর্ত্তুমশক্যত্বাৎ পরধর্ম্মস্য চাহিংসাদেঃ সুকরত্বাৎ ধর্ম্মত্বাবিশেষাচ্চ তত্র প্রবর্ত্তিতুমিচ্ছন্তং প্রত্যাহ শ্রেয়ানিতি : কিঞ্চিদঙ্গহীনো-
পি স্বধর্ম্মঃ শ্রেয়ান্ প্রশস্যতরঃ : স্বনুষ্ঠিতাৎ সকলাঙ্গসম্পূর্ণাৎ কৃতাদপি পরধর্ম্মাৎ সকাশাৎ । তত্র হেতুঃ স্বধর্ম্মে যুদ্ধাদৌ প্রবর্ত্তমানস্য নিধনং মরণমপি শ্রেষ্ঠং স্বর্গাদিপ্রাপকত্বাৎ : পরধর্ম্মস্তু পরস্য ভ-
য়াবহঃ : নিষিদ্ধত্বেন নিরয়প্রাপকত্বাৎ ॥৩৫॥ তয়োর্ন বশমাগচ্ছেদিত্যুক্তং তদেতদশক্যং মন্বানোঽর্জ্জুন উবাচ । অথেতি : বৃষ্ণিবংশে হ্যবতীর্ণত্বাৎ বার্ষ্ণেয় : অনর্থরূপং পাপং কর্ত্তুমনিচ্ছন্নপি কেন প্রযুক্তঃ প্রেরিতো-
ঽয়ং পুরুষঃ পাপং চরতি : কামক্রোধৌ বিবেকবলেন নিরুন্ধতোপি পুরুষস্য পুনঃ পাপে প্রবৃত্তিদর্শনাদন্যোপি তয়োর্মূলভূতঃ কশ্চিৎ প্রবর্ত্তকো ভবেদিতি : সম্ভাবনায়াঃ প্রশ্নঃ ॥ ৩৬ ॥

অত্রোত্তরং শ্রীভগবানুবাচ কামএষইত্যাদি। যস্ত্বয়াপৃষ্টোহেতুরেষকামএব নতুক্রোধোপি ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থেইত্যত্রসহ নাসোতঃ পৃথক্ কিন্তুক্রোধোপ্যেষএব কামএব
হিকেনচিৎপ্রতিহতঃ ক্রোধাত্মনাপরিণমতে অতঃ পূর্বশ্লোকেনোক্তোপি ক্রোধঃ কামএবেত্যভিপ্রায়েণকামেনৈকীকৃত্যোচ্যতে রজোগুণাৎ সমুদ্ভবতীতি তথা অনেনসত্ত্ববৃদ্ধ্যারজসিক্ষয়ংনীতেক
ম্নোপায়ীয়ন্তেইতিসূচিতং এনংকামমিহমোক্ষমার্গেবৈরিণংবিদ্ধি অয়ংচবধএবসানত্বাদিনাশমং নেতুংশক্যঃ যতোনায়ংদানেনসংক্রান্তিংশক্তোপ্যাহ মহাশনঃ মহৎঅশনং যস্যদুষ্পূরইত্যর্থঃ নচসাম্নাসন্ধা
তুংশক্যঃ যতোমহাপাপ্মাঅত্যুগ্রঃ ॥৩৭॥ কামস্যবৈরিত্বংদর্শয়তি ধূমেনেতি যথাধূমেনসহজেনবহ্নিরাব্রিয়তে আচ্ছাদ্যতে যথাচাদর্শোমলেনাগন্তুকেন যথাচোল্বেনগর্ভবেষ্টনচর্ম্ম

কামএষক্রোধএষরজোগুণসমুদ্ভবঃ। মহাশনোমহাপাপ্মাবিদ্ধ্যেনমিহবৈরিণং ॥৩৭॥ ধূমেনাব্রিয়তেবহ্নির্যথাদর্শোমলেনচ। যথোল্বেনাবৃতোগর্ভস্তথাতেনেদমাবৃতং ॥৩৮॥ আবৃতংজ্ঞানমেতেনজ্ঞানিনোনিত্যবৈরিণা।
১৭ কামরূপেণকৌন্তেয়দুষ্পূরেণানলেনচ ॥৩৯॥ ইন্দ্রিয়াণিমনোবুদ্ধিরস্যাধিষ্ঠানমুচ্যতে। এতৈর্বি
মোহয়ত্যেষজ্ঞানমাবৃত্যদেহিনং ॥৪০॥

ণাগর্ভঃ সর্বতোনিরুদ্ধআবৃতঃ তথাপ্রকারত্রয়েণাপি তেনকামেনইদমাবৃতং ॥৩৮॥ ইদংশব্দনির্দিষ্টংদর্শয়ন্বৈরিত্বংস্ফুটয়তি আবৃতমিতি ইদংবিবেকজ্ঞানমেতেনকামেনআবৃতং অজ্ঞস্যত্ব
ভোগসময়েকামঃ সুখহেতুরেব পরিণামেতুবৈরিত্বংপ্রতিপদ্যতে। জ্ঞানিনঃ পুনঃ তৎকালমপ্যনর্থানুসন্ধানাদ্দুঃখহেতুরেবেতি নিত্যবৈরিণেত্যুক্তং কিংচবিষয়ৈঃ পূর্যমাণোপি যোদুষ্পূরঃ আপূর্যমা
নস্তুশোকসন্তাপহেতুশ্চাদনলতুল্যঃ অনেনসর্বাত্মনাপ্রতিনিত্যবৈরিত্বমুক্তং ॥৩৯॥ ইদানীংতস্যাধিষ্ঠানংকথয়ন্ জয়োপায়মাহ ইন্দ্রিয়াণীতিদ্বাভ্যাং বিষয়দর্শনশ্রবণাদিভিঃ সংকল্পনাধ্যব
সায়েনচকামস্যাবির্ভাবাদিন্দ্রিয়াণিচমনশ্চবুদ্ধিশ্চাস্যাধিষ্ঠানমুচ্যতে এতৈরিন্দ্রিয়াদিভির্দর্শনাদিব্যাপারবদ্ভিরাশ্রয়ভূতৈঃ বিবেকজ্ঞানমাবৃত্যদেহিনংবিমোহয়তি ॥ ৪০ ॥

যস্মাদেবং তস্মাদাদৌ বিমোহাৎ প্রথমমেবেন্দ্রিয়াণি মনোবুদ্ধিঞ্চ নিয়ম্য : পাপরূপমেনং কামং স্ফুটং প্রজহি ঘাতয় । যদ্বা প্রজহীহি পরিত্যজ : জ্ঞানমাত্মবিষয়ং : বিজ্ঞানং শাস্ত্রীয়ং তয়োর্ন্নাশকং : যদ্বা জ্ঞা
নং শাস্ত্রাচার্য্যোপদেশজং : বিজ্ঞানং নিদিধ্যাসনং : বিজ্ঞায় প্রজ্ঞাং কুর্ব্বীতেতি শ্রুতেঃ ॥ ৪১ ॥ যত্র চিত্তপ্রণিধানেনেন্দ্রিয়াণি নিয়ন্তুং শক্যন্তে তদাত্মস্বরূপং দেহাদিভ্যো বিবিচ্য দর্শয়তি : ইন্দ্রিয়াণীতি : ইন্দ্রিয়
াণি দেহাদিভ্যঃ গ্রাহ্যেভ্যঃ পরাণি শ্রেষ্ঠান্যাহুঃ : সূক্ষ্মত্বাৎ প্রকাশকত্বাচ্চ : অতএব তদ্ব্যতিরিক্তত্বমর্থাদ্ভবতি ইন্দ্রিয়েভ্যঃ সঙ্কল্পাত্মকং মনঃ পরং তৎপ্রবর্ত্তকত্বাৎ : মনসস্তু বুদ্ধির্নিশ্চয়াত্মিকা প
রা নিশ্চয়পূর্ব্বকত্বাৎ সঙ্কল্পস্য : যস্তু বুদ্ধেঃ পরঃ তৎসাক্ষিত্বেনাবস্থিতঃ সর্ব্বান্তরঃ স আত্মা তং বিমোহয়তি দেহিনমিতি : দেহী সর্ব্বদৃগাত্মা স ইতি পরামৃশ্যতে ॥ ৪২ ॥ উপসংহরতি এবমিত্যাদি

তস্মাত্ত্বমিন্দ্রিয়াণ্যাদৌ নিয়ম্য ভরতর্ষভ" । পাপ্মানং প্রজহি হ্যেনং জ্ঞানবিজ্ঞা নাশনং" ॥ ৪১ ॥ ইন্দ্রিয়াণি পরাণ্যাহুরিন্দ্রিয়েভ্যঃ পরং মনঃ" ৮
মনসস্তু পরা বুদ্ধির্যো বুদ্ধেঃ পরতস্তু সঃ" ॥ ৪২ ॥ এ বং বুদ্ধেঃ পরং বুদ্ধ্বা সংস্তভ্যাত্মানমাত্মনা" । জহি শত্রুং মহাবাহো কাম
রূপং দুরাসদং" ॥ ৪৩ ॥ ইতি শ্রীভগবদ্গীতাসূপনিষৎসু কর্ম্মযোগো নাম তৃতীয়োধ্যায়ঃ" ॥ ❀ ॥
ভগবানুবাচ ॥ ইমং বিবস্বতে যোগং প্রোক্তবানহমব্যয়ং" । বিবস্বান্মনবে প্রাহ মনুরিক্ষ্বাকবেঽব্রবীৎ" ॥ ১ ॥

বুদ্ধেরেব বিষয়েন্দ্রিয়াদিজন্যাঃ কামাদিবিক্রিয়াঃ : আত্মা তু নির্ব্বিকারঃ তৎসাক্ষীত্যেবং : বুদ্ধেঃ পরমাত্মানং বুদ্ধ্বা আত্মনা এবম্ভূতনিশ্চয়াত্মিকয়া বুদ্ধ্যা আত্মানং মনঃ সংস্তভ্য নিশ্চলং কৃত্বা কামরূপং শত্রুং জহি মারয় : দুরাস
দং দুঃখেনাসাদনীয়ং দুর্ব্বিজ্ঞেয়মিত্যর্থঃ ॥ ৪৩ ॥ স্বধর্ম্মেণ যমারাধ্য ভক্ত্যা মুক্তিমিতা বুধাঃ ৮ তং কৃষ্ণং পরমানন্দং তোষয়েৎ সর্ব্বকর্ম্মভিঃ ॥ ❀ ॥ ইতি শ্রীসুবোধিন্যাং তৃতীয়োধ্যায়ঃ ॥ ❀ ॥ কর্ম্ম
যোগোঽতিগূঢ়ার্থঃ চিত্তশুদ্ধ্যৈ প্রপঞ্চিতঃ । পূর্ব্বাধ্যায়দ্বয়েনাপি বিশোকায় মহীয়সা ॥ তুর্য্যে তমেব প্রাক্তনো নীতং যোগং প্রাহ হরিঃ । যথা পরম্পরাপ্রোক্তং স্তুবন্ তদ্বংশদীর্ঘতাং ॥ এবং তাবদধ্যায়দ্বয়েন : কর্ম্মযোগো
পায়ঃ জ্ঞানযোগো মোক্ষসাধনত্বেনোক্তঃ তমেব ব্রহ্মার্পণাদিগুণবিধানেন তত্ত্বম্পদার্থবিবেকাদিনা চ প্রপঞ্চয়িষ্যন্ প্রথমং তাবৎ পরম্পরাপ্রাপ্তত্বেন স্তুবন্ : শ্রীভগবানুবাচ ইমমিতি ত্রিভিঃ অব্যয়ফলত্বাদব্যয়ং ইমং যো
গং বিবস্বতে আদিত্যায় পুরাহং কথিতবান : স চ স্বপুত্রায় মনবে প্রাহ : মনুশ্চ স্বপুত্রায়েক্ষ্বাকবেঽব্রবীৎ ॥

এবমিতি · রাজানশ্চ তে ঋষয়শ্চ · অন্যেপি রাজর্ষয়ো নিমিপ্রমুখাঃ স্বপিত্রাদিভিরিক্ষ্বাকুপ্রমুখৈঃ প্রোক্তমিমং যোগং বিদুঃ জানন্তি স্ম · অদ্যতনানামজ্ঞানে কারণমাহ · হে পরন্তপ শত্রুতাপন · স যোগঃ কালবশাদি
হ লোকে নষ্টঃ বিচ্ছিন্নঃ ॥ ২ ॥ স এবায়মিত্যাদি · স এবায়ং যোগঃ ইদানীং বিচ্ছিন্নে সম্প্রদায়ে সতি · পুনশ্চ ময়া তে তুভ্যং প্রোক্তঃ । যতস্ত্বং মম ভক্তোসি সখা চ · অন্যস্মৈ ময়া নোচ্যতে · হি যস্মাদুত্তমং রহস্যং ॥ ৩ ॥ ভ
গবতো বিবস্বন্তং প্রতি · যোগোপদেশমসম্ভবং পশ্যন্নর্জুন উবাচ । অপরমিতি অপরমর্বাচীনং তব জন্ম · পরং প্রাক্কালীনং বিবস্বতো জন্ম তস্মাত্ত্বমেবাদৌ পুরাতনায় বিবস্বতে ইমং যোগং প্রোক্তবানিতি কথ
মহং জানীয়াং জ্ঞাতুং শক্নুয়াং ॥ ৪ ॥ রূপান্তরেণোপদিষ্টবানিত্যভিপ্রায়েণোত্তরং শ্রীভগবানুবাচ · বহূনীত্যাদি । তান্যহং বেদ বেদ্মি · অলুপ্তবিদ্যাশক্তিত্বাৎ · ত্বন্তু ন বেৎসি অবিদ্যাবৃতত্বাৎ ॥ ৫ ॥

এবং পরম্পরাপ্রাপ্তমিমং রাজর্ষয়ো বিদুঃ । স কালেনেহ মহতা যোগো নষ্টঃ পরন্তপ ॥ ২ ॥ স এবায়ং ময়া তেদ্য যোগঃ প্রোক্তঃ পুরাতনঃ । ভ
ক্তোসি মে সখা চেতি রহস্যং হ্যেতদুত্তমং ॥ ৩ ॥ অর্জুন উবাচ ॥ অপ
রং ভবতো জন্ম পরং জন্ম বিবস্বতঃ । কথমেতদ্বিজানীয়াং ত্বমাদৌ প্রোক্ত
গী।১৮ বানিতি ॥ ৪ ॥ ভগবানুবাচ ॥ বহূনি মে ব্যতীতানি জন্মানি তব চার্জুন । তান্যহং বেদ সর্বাণি ন ত্বং বেত্থ পরন্তপ ॥ ৫ ॥ অজোপি সন্নব্যয়াত্মা ভূ
তানামীশ্বরোপি সন্ । প্রকৃতিং স্বামধিষ্ঠায় সম্ভবাম্যাত্ম মায়য়া ॥ ৬ ॥

ননু ২ নাদেস্তব কুতো জন্ম · অবিনাশিনশ্চ কথং পুনঃ পুনর্জন্ম · যেন বহূনি মে ব্যতীতানি জন্মানি · জীবস্যাপি পুণ্যপাপবিহীনস্য কথং তাদৃশী জন্মতস্তথা আহ · অজোপীতি · সত্য
মেবং তথাপ্যজো জন্মশূন্যোপি সন্নহং তথা অব্যয়াত্মাপি · অনশ্বরস্বভাবোপি সন্ তথা ঈশ্বরোপি কর্মপারতন্ত্ররহিতোপি সন্ স্বমায়য়া সম্ভবামি · সম্যগপ্রচ্যুতজ্ঞানবলবীর্যাদিশক্ত্যৈব ভবা
মি । ননু তথাপি ষোড়শকলাত্মকলিঙ্গদেহশূন্যস্য চ তব কুতো জন্মেতি অত উক্তং · স্বাং শুদ্ধসত্ত্বাত্মিকাং প্রকৃতিমধিষ্ঠায় স্বীকৃত্য বিশুদ্ধোর্জিতসত্ত্বমূর্ত্যা স্বেচ্ছয়াবতরামীত্যর্থঃ ॥ ৬ ॥

কদা সম্ভবামীত্যপেক্ষায়ামাহ যদা যদেতি। গ্লানির্হানিঃ অভ্যুত্থানমাধিক্যং ॥ ৭ ॥ কিমর্থমিত্যপেক্ষায়ামাহ পরিত্রাণায়েতি। সাধূনাং স্বধর্মবর্তিনাং রক্ষণায় দুষ্টং কর্ম কুর্বন্তীতি দুষ্কৃতস্তেষাং বধায় চ এবং ধর্মসংস্থাপনায় সাধুরক্ষণেন দুষ্টবধেন চ ধর্মং স্থিরীকর্তুং যুগে যুগে তত্তদবসরে সম্ভবামীত্যর্থঃ। ন চৈবং দুষ্টনিগ্রহং কুর্বতোঽপি নৈর্ঘৃণ্যং শঙ্কনীয়ং যথাহুঃ। লালনে তাডনে মাতুর্নাকারুণ্যং যথার্ভকে। তদ্বদেব মহেশস্য নিয়ন্তুর্গুণদোষয়োরিতি ॥ ৮ ॥ এবংবিধানামীশ্বরজন্মকর্মণাং জ্ঞানে ফলমাহ জন্মেতি। মম জন্ম স্বেচ্ছয়া কৃতং কর্ম চ ধর্মপালনরূপং দিব্যমলৌকিকং তত্ত্বতঃ পরমার্থতো যো বেত্তি স দেহাভিমানং ত্যক্ত্বা পুনর্জন্ম নৈতি ন প্রাপ্নোতি কিন্তু মামেব প্রাপ্নোতি ॥ ৯ ॥ কথং জন্মকর্মজ্ঞানেন ত্বৎপ্রাপ্তিঃ স্যাদিত্যাহ বীতরাগেত্যাদি। অহং জন্মসময়ে ধর্মপালনঞ্চ করোমীতি

যদা যদা হি ধর্মস্য গ্লানির্ভবতি ভারত। অভ্যুত্থানমধর্মস্য তদাত্মানং সৃজাম্যহং ॥ ৭ ॥ পরিত্রাণায় সাধূনাং বিনাশায় চ
দুষ্কৃতাং। ধর্মসংস্থাপনার্থায় সম্ভবামি যুগে যুগে ॥ ৮ ॥ জন্ম কর্ম চ মে দিব্যমেবং যো বেত্তি তত্ত্বতঃ।
ত্যক্ত্বা দেহং পুনর্জন্ম নৈতি মামেতি সোঽর্জুন ॥ ৯ ॥ বীতরাগভয়ক্রোধা মন্ময়া মামুপাশ্রিতাঃ। বহবো জ্ঞান
তপসা পূতা মদ্ভাবমাগতাঃ ॥ ১০ ॥ যে যথা মাং প্রপদ্যন্তে তাংস্তথৈব ভজা
ম্যহং। মম বর্ত্মানুবর্তন্তে মনুষ্যাঃ পার্থ সর্বশঃ ॥ ১১ ॥

[illegible]

মদীয়ং জন্মকর্মলীলাকৌতুকং জ্ঞাত্বা বীতা বিগতা রাগভয়ক্রোধা যেভ্যস্তে বিক্ষেপাভাবাৎ মন্ময়া মদেকচিত্তা মামেবাশ্রিতাঃ সন্তো মৎপ্রসাদলব্ধং যদাত্মজ্ঞানং তপস্তৎপরিপাকহেতুঃ স্বধর্মঃ তয়োর্দ্বন্দ্ব করণাৎ তেন জ্ঞানতপসা পূতাঃ শুদ্ধাঃ নিরস্তাজ্ঞানতৎকার্যমলাঃ মদ্ভাবং মৎসাযুজ্যং প্রাপ্তা বহবঃ। ন ত্বধুনৈব প্রবৃত্তোঽয়ং মদ্ভক্তিমার্গ ইত্যর্থঃ। তদুক্তং তানহং বেদ সর্বাণীত্যাদিনা বিদ্যাবিদ্যো পাধিভ্যাং তত্ত্বম্পদার্থাবীশ্বরজীবৌ প্রদর্শ্য তৎপদার্থস্য জন্মকর্মণোশ্চাবিদ্যাভাবেন নিত্যশুদ্ধত্বাৎ ত্বম্পদার্থস্যাপি জীবস্য চেশ্বরপ্রসাদনকৃতজ্ঞানেনাজ্ঞাননিবৃত্তেঃ শুদ্ধস্য সতশ্চিদংশেন তদৈক্যং জ্ঞাতব্যং ॥ ১০ ॥ ননু তর্হি ত্বয্যপি বৈষম্যমস্তি যস্মাদেবং ত্বদেকশরণানামেবাত্মভাবং দদাসি নান্যেষাং সকামানামিত্যত আহ যে যথেত্যাদি। যথা যেন প্রকারেণ সকামতয়া নিষ্কামতয়া বা যে মাং ভজন্তি তানহং তথৈব তদপেক্ষিতফলদানেন ভজামি। ন তু সকামা মাং বিহায় ইন্দ্রাদীনেব ভজন্তীতি মন্তব্যং। যতঃ সর্বশঃ সর্বপ্রকারেণাপীন্দ্রাদিসেবকা অপি মমৈব বর্ত্ম ভজনমার্গমনুবর্তন্তে

নতর্হি মোক্ষায় ত্বং কিমিতি সর্ব্বে ন ভজন্তীত্যত আহ কাঙ্ক্ষন্ত ইতি : কর্ম্মণাং ফলং কাঙ্ক্ষন্তঃ প্রায়শঃ ইহ মনুষ্যলোকে ইন্দ্রাদিদেবতা এব যজন্তে : ন তু সাক্ষান্মামেব : হি যস্মাৎ কর্ম্মজা সিদ্ধিঃ কর্ম্মজং ফলং শীঘ্রং ভবতি : ন তু জ্ঞা
নফলং কৈবল্যং দুষ্প্রাপত্বাৎ জ্ঞানস্য ॥ ১২ ॥ নন্বা কেচিৎ সকামতয়া প্রবর্ত্তন্তে : কেচিন্নিষ্কামতয়েতি কর্ম্মবৈচিত্র্যং : তৎকর্ত্তৄণাঞ্চ ব্রাহ্মণাদীনামুত্তমমধ্যমাদিবৈচিত্র্যং কুর্ব্বতস্তব কথং বৈষম্যং নাস্তীত্যাশঙ্ক্যাহ চাতু
র্ব্বর্ণ্যমিতি : চত্বারো বর্ণা এব চাতুর্ব্বর্ণ্যং স্বার্থে ষ্যঞ্‌প্রত্যয়ঃ : অয়মর্থঃ : সত্ত্বপ্রধানা ব্রাহ্মণাস্তেষাং শমদমাদীনি কর্ম্মাণি : সত্ত্বরজঃপ্রধানাঃ ক্ষত্রিয়াস্তেষাং শৌর্য্যযুদ্ধাদীনি কর্ম্মাণি : রজস্তমঃপ্রধানা বৈশ্যাঃ তেষ
াং কৃষিবাণিজ্যাদীনি কর্ম্মাণি : তমঃপ্রধানাঃ শূদ্রাস্তেষাঞ্চ ত্রৈবর্ণিকশুশ্রূষাদীনি কর্ম্মাণি : ইত্যেবং গুণানাং কর্ম্মণাঞ্চ বিভাগশশ্চাতুর্ব্বর্ণ্যং ময়ৈব সৃষ্টমিতি সত্যং : তথাপ্যেবং তস্য কর্ত্তারমপি ফলতো২কর্ত্ত

২০ কাঙ্ক্ষন্তঃ কর্ম্মণাং সিদ্ধিং যজন্ত ইহ দেবতাঃ ॥ ৮ ক্ষিপ্রং হি মানুষে লোকে সিদ্ধির্ভবতি কর্ম্মজা ॥ ॥ ১২ ॥ চা

গী।৭ চাতুর্ব্বর্ণ্যং ময়া সৃষ্টং গুণকর্ম্মবিভাগশঃ ॥ ৮ তস্য কর্ত্তারমপি মাং বিদ্ধ্যকর্ত্তারমব্যয়ং ॥ ॥ ১৩ ॥

ন মাং কর্ম্মাণি লিম্পন্তি ন মে কর্ম্মফলে স্পৃহা ॥ ৮ ইতি মাং যোঽভিজানাতি কর্ম্মভির্ন স বধ্যতে ॥ ॥ ১৪ ॥

এবং জ্ঞাত্বা কৃতং কর্ম্ম পূর্ব্বৈরপি মুমুক্ষুভিঃ ॥ ৮ কুরু কর্ম্মৈব তস্মাত্ত্বং পূর্ব্বৈঃ পূর্ব্বতরং কৃতং ॥ ॥ ১৫ ॥

মেবেতি মাং বিদ্ধি : তত্র হেতুঃ অব্যয়মাসক্তিরাহিত্যেন শ্রমরহিতং ॥ ১৩ ॥ তদেব দর্শয়ন্নাহ ন মামিত্যাদি : কর্ম্মাণি বিশ্বসৃষ্ট্যাদীন্যপি মাং ন লিম্পন্তি : আসক্তিজনকত্বাভাবান্নিরহঙ্কারত্বাৎ : আপ্তকামত্বেন মম ফলস্পৃ
হাভাবাচ্চ : মাং ন লিম্পন্তীতি কিমু বক্তব্যং : এবং কর্ম্মফলস্পৃহারাহিত্যেন যো মামভিজানাতি : সোঽপি কর্ম্মভির্ন বধ্যতে । মম নির্লেপত্বকারণং নিরহঙ্কারত্বনিস্পৃহত্বাদিকং জানতস্তস্যাপ্যহঙ্কারাদিশৈথিল্যাৎ ॥ ১৪ ॥
যে যথা মামিত্যাদি চতুর্ভিঃ শ্লোকৈঃ প্রাসঙ্গিকমীশ্বরস্য বৈষম্যং পরিহৃত্য প্রথমাধ্যায়োক্তমেব কর্ম্মযোগং প্রপঞ্চয়িতুমনুস্মারয়তি এবমিত্যাদি । অহঙ্কারাদিরাহিত্যেন কৃতং কর্ম্ম বন্ধকং ন ভবতীত্যেবং জ্ঞাত্বা পূর্ব্বৈ
র্জনকাদিভিরপি মুমুক্ষুভিঃ সত্ত্বশুদ্ধ্যর্থং পূর্ব্বতরং যুগান্তরেঽপি কৃতং তস্মাৎ ত্বমপি প্রথমং কর্ম্মৈব কুর্ব্বিতি ॥ ১৫ ॥ শ্রীকৃষ্ণায় নমঃ । ওঁ নমঃ শিবায় ॥

নোক্ষঃ২

তচ্চ তত্ত্ববিদ্ভিঃ সহ বিচার্য্য কর্ত্তব্যং ন লোকপরম্পরাপ্রাপ্তমাত্রেণ ইত্যাহ কিং কর্ম্মেত্যাদি কিং কর্ম্ম কীদৃশং কর্ম্মকরণং কিমকর্ম্ম কীদৃশং কর্ম্মাকরণং ইত্যেতস্মিন্নর্থে বিবেকিনোঽপি মোহিতাঃ অতো যজ্জ্ঞাত্বা যদনুষ্ঠায়াশুভাৎ সংসারাৎ মোক্ষ্যসে মুক্তো ভবিষ্যসি তৎ কর্ম্মাকর্ম্ম চ তুভ্যং প্রবক্ষ্যামীত্যন্বয়ঃ ॥১৬॥ ননু প্রসিদ্ধমেব কর্ম্ম দেহাদিব্যাপারাত্মকং অকর্ম্ম চ তদব্যাপারাত্মকং অতঃ কথমত্র কবয়োঽপি মোহিতা ইত্যাশঙ্ক্যাহ কর্ম্মণ ইতি কর্ম্মণো বিহিতব্যাপারস্যাপি তত্ত্বং বোদ্ধব্যমস্তি ন তু লোকপ্রসিদ্ধমাত্রমেব অকর্ম্মণো হ্যব্যাপারস্যাপি তত্ত্বং বোদ্ধব্যমস্তি বিকর্ম্মণো নিষিদ্ধব্যাপারস্যাপি তত্ত্বং বোদ্ধব্যমস্তি যতঃ কর্ম্মণো গতির্গহনা কর্ম্মণ ইত্যুপলক্ষণার্থং কর্ম্মাকর্ম্মবিকর্ম্মণাং তত্ত্বং দুর্ব্বিজ্ঞেয়মিত্যর্থঃ ॥১৭॥ তদেব কর্ম্মাদীনাং দুর্ব্বিজ্ঞেয়ত্বং দর্শয়ন্নাহ কর্ম্মণীতি পরমেশ্বরারাধনলক্ষণে কর্ম্মণি বিষয়ে অকর্ম্ম কর্ম্মেদং ন ভবতি ইতি যঃ পশ্যেৎ তস্য জ্ঞানহেতুত্বেন বন্ধকত্বাভাবাৎ অকর্ম্মণি চ বিহিতাকরণে কর্ম্ম যঃ পশ্যেৎ প্রত্যবায়াপাদকত্বেন বন্ধহেতুত্বাৎ স মনুষ্যেষু কর্ম্ম কুর্ব্বাণেষু স বুদ্ধিমান্ ব্যবসায়াত্মিকবুদ্ধিমত্ত্বাৎ শ্রেষ্ঠঃ তত্র হেতুঃ স যুক্তো

কিং কর্ম্ম কিমকর্ম্মেতি কবয়োঽপ্যত্র মোহিতাঃ। তত্তে কর্ম্ম প্রবক্ষ্যামি যজ্জ্ঞাত্বা মোক্ষ্যসেঽশুভাৎ ॥১৬॥ কর্ম্মণো হ্যপি বোদ্ধব্যং বোদ্ধব্যঞ্চ বিকর্ম্ম

ণঃ। অকর্ম্মণশ্চ বোদ্ধব্যং গহনা কর্ম্মণো গতিঃ ॥১৭॥ কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদকর্ম্মণি চ কর্ম্ম যঃ। স বুদ্ধিমান্ মনুষ্যেষু স যুক্তঃ কৃৎস্নকর্ম্মকৃৎ ॥১৮॥

যোগী তেন কর্ম্মণা জ্ঞানযোগারূঢ়ঃ সন্ কৃৎস্নকর্ম্মকৃচ্চ সর্ব্বতঃ সংপ্লুতোদকস্থানীয়ে তস্মিন্ কর্ম্মণি সর্ব্বকর্ম্মফলানামন্তর্ভাবাৎ। তদেবমারুরুক্ষোঃ কর্ম্মযোগাধিকারাবস্থায়াং ন কর্ম্মণামনারম্ভাদিত্যাদিনোক্তস্য কর্ম্মযোগস্য স্তুতিঃ তৎপ্রপঞ্চকত্বাচ্চাস্য প্রকরণস্য ন পৌনরুক্ত্যদোষঃ অনেনৈব যোগারূঢাবস্থায়াং যস্ত্বাত্মরতিরেব স্যাদিত্যাদিনা যঃ কর্ম্মানুপযোগ উক্তস্তস্যাপ্যর্থাৎ প্রপঞ্চঃ কৃতো বেদিতব্যঃ যদা আরুরুক্ষোরপি কর্ম্ম বন্ধকং ন ভবতি তদা আরূঢস্য কথং বন্ধকং স্যাদিতি অথাপি নৈকো যুজ্যতে কর্ম্মণি দেহাদিব্যাপারে বর্ত্তমানেঽপি আত্মনো দেহাদিব্যতিরেকানুভবেন অকর্ম্ম স্বাভাবিকং নৈষ্কর্ম্ম্যমেব যঃ পশ্যেৎ তথা অকর্ম্মণি চ জ্ঞানরহিতে দুঃখবুদ্ধ্যা কর্ম্মণাং ত্যাগে কর্ম্ম যঃ পশ্যেৎ তস্য প্রযত্নসাধ্যত্বেন মিথ্যাচারত্বাৎ তদুক্তং কর্ম্মেন্দ্রিয়াণি সংযম্যেত্যাদিনা এবম্ভূতঃ স তু সর্ব্বেষু মনুষ্যেষু বুদ্ধিমান্ পণ্ডিতঃ তত্র হেতুঃ যতঃ কৃৎস্নানি কর্ম্মাণি যদৃচ্ছয়া প্রাপ্তানি আহারাদীনি সর্ব্বাণি কর্ম্মাণি কুর্ব্বন্নপি স যুক্ত এব অকর্ত্রাত্মজ্ঞানেন সমাধিস্থ এবেত্যর্থঃ অনেনৈব জ্ঞানিনঃ স্বভাবাদাপন্নং কলঞ্জাদিভক্ষণং ন দোষঃ অজ্ঞস্য তু রাগতঃ কৃতং দোষ ইতি বিকর্ম্মণোঽপি তত্ত্বং নিরূপিতং দ্রষ্টব্যং ॥ ১৮ ॥

কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যাদিনা প্রস্তুতার্থান্তরং যদুক্তমর্থং প্রপঞ্চয়তি। যস্যেত্যাদি পঞ্চভিঃ। সম্যগারভ্যন্ত ইতি সমারম্ভাঃ কর্ম্মাণি। কাম্যত ইতি কামঃ ফলং তৎসঙ্কল্পেন বর্জ্জিতা যস্য ভবন্তি তং পণ্ডিতমাহুঃ।
তত্র হেতুঃ তথাভূতৈঃ সমারম্ভৈঃ শুদ্ধে চিত্তে সতি জাতেন জ্ঞানাগ্নিনা দগ্ধানি অকর্ম্মতাং নীতানি কর্ম্মাণি যস্য তং। অয়ং ভাবঃ ফলবিষয়ঃ তদর্থমিদং কর্ত্তব্যমিতি কর্ম্মবিষয়ঃ সঙ্কল্পঃ তাভ্যাং ব-
র্জ্জিতাঃ শেষং স্পষ্টং ॥ ১৯ ॥ কিঞ্চ ত্যক্ত্বেত্যাদি। কর্ম্মণি তৎফলে চাসক্তিং ত্যক্ত্বা নিত্যেন নিজানন্দেন তৃপ্তঃ। অতএব যোগক্ষেমার্থমাশ্রয়ণীয়রহিতঃ এবম্ভূতো যঃ স্বাভাবিকে বিহিতে বা কর্ম্মণি অ-
ভিতঃ প্রবৃত্তোপি কিঞ্চিদপি নৈব করোতি। তস্য কর্ম্ম অকর্ম্মতামাপদ্যত ইতি ॥ ২০ ॥ কিঞ্চ নিরাশীরিত্যাদি। নির্গতা আশিষঃ কামা যস্মাৎ যতং নিয়তং চিত্তং আত্মা শরীরঞ্চ যস্য। ত্যক্তাঃ সর্ব্বে পরি-

যস্য সর্ব্বে সমারম্ভাঃ কামসঙ্কল্পবর্জ্জিতাঃ। জ্ঞানাগ্নিদগ্ধকর্ম্মাণং তমাহুঃ পণ্ডিতং বুধাঃ ॥ ১৯ ॥ ত্যক্ত্বা কর্ম্মফলাসঙ্গং নিত্যতৃপ্তো নি-

শ্রীঃ২১ রাশ্রয়ঃ। কর্ম্মণ্যভিপ্রবৃত্তোপি নৈব কিঞ্চিৎ করোতি সঃ ॥ ২০ ॥ নিরাশীর্যতচিত্তাত্মা ত্যক্তসর্ব্বপরিগ্রহঃ। শারীরং কেবলং কর্ম্ম কুর্ব্বন্নাপ্নো-

তি কিল্বিষং ॥ ২১ ॥ যদৃচ্ছালাভসন্তুষ্টো দ্বন্দ্বাতীতো বিমৎসরঃ। সমঃ সিদ্ধাবসিদ্ধৌ চ কৃত্বাপি ন নিবধ্যতে ॥ ২২ ॥

গ্রহা যেন সঃ। শারীরং শরীরমাত্রনির্ব্বর্ত্যং কর্ত্তৃত্বাভিনিবেশরহিতং কর্ম্ম কুর্ব্বন্নপি কিল্বিষং বন্ধনং ন প্রাপ্নোতি। যোগারূঢ়পক্ষে শরীরনির্ব্বাহমাত্রোপযোগি স্বাভাবিকং ভিক্ষাটনাদিকং কুর্ব্বন্নপি
কিল্বিষং বিহিতাকরণনিমিত্তদোষং ন প্রাপ্নোতি ॥ ২১ ॥ কিঞ্চ যদৃচ্ছেত্যাদি। অপ্রার্থিতোপস্থিতো লাভো যদৃচ্ছালাভঃ তেন সন্তুষ্টঃ। দ্বন্দ্বানি শীতোষ্ণাদীনি অতীতো অতিক্রান্তঃ তৎসহনশীল ইত্যর্থঃ।
বিমৎসরো নির্ব্বৈরঃ। যদৃচ্ছালাভস্যাপি সিদ্ধাবসিদ্ধৌ চ সমঃ হর্ষবিষাদরহিতঃ। য এবম্ভূতঃ স পূর্ব্বোক্তভূমিকায়াং যথোচিতং স্বাভাবিকং কর্ম্ম কৃত্বাপি বন্ধং ন প্রাপ্নোতি ॥
॥ ২২ ॥

কিঞ্চ গতসঙ্গস্যেতি গতসঙ্গস্য নিষ্কামস্য মুক্তস্য রাগাদিভির্জ্ঞানে অবস্থিতং চেতো যস্য তস্য যজ্ঞায় পরমেশ্বরার্থং কর্ম্মাচরতঃ সমগ্রং সবাসনং কর্ম্ম প্রবিলীয়তে অকর্ম্মতামাপদ্যতে আরুরুক্ষোঃ যজ্ঞায়েতি যজ্ঞরক্ষণার্থং
লোকসংগ্রহায় কর্ম্ম কুর্ব্বতোপীত্যর্থঃ ॥ ২৩ ॥ তদেব পরমেশ্বরারাধনলক্ষণং কর্ম্ম জ্ঞানহেতুত্বেন বন্ধকত্বাভাবাদকর্ম্মৈব আত্মজ্ঞানস্থায়ার কর্ম্মণো জ্ঞানবাধিত্বাৎ স্বাভাবিকমপি সকর্ম্মৈব কর্ম্মণ্যকর্ম্ম
যঃ পশ্যেদিত্যাদিনা উক্তঃ কর্ম্মপ্রবিলয়ঃ প্রপঞ্চিতঃ ইদানীং কর্ম্মনিতিদর্শিতং ব্রহ্মৈবাত্র যুক্তং পশ্যতঃ কর্ম্মপ্রবিলয়মাহ ব্রহ্মার্পণমিতি অর্প্যতে অনেনেত্যর্পণং স্রুগাদি তদপি ব্রহ্মৈব অর্প্য
মাণং হবিরপি ঘৃতাদিকং ব্রহ্মৈব ব্রহ্মৈবাগ্নি তস্মিন্ ব্রহ্মণা কর্ত্রা হুতং হোমঃ অগ্নিশ্চ কর্ত্তা চ ক্রিয়া চ ব্রহ্মৈবেত্যর্থঃ এবং ব্রহ্মণ্যেব কর্ম্মাত্মকে সমাধিশ্চিত্তৈকাগ্র্যং যস্য তেন ব্রহ্মৈব গন্তব্যং

গতসঙ্গস্যমুক্তস্যজ্ঞানাবস্থিতচেতসঃ" ১ যজ্ঞায়াচরতঃ কর্ম্ম সমগ্রং প্র বিলীয়তে" ॥ ২৩ ॥ ব্রহ্মার্পণং ব্রহ্ম হবির্ব্রহ্মাগ্নৌ ব্রহ্মণা হুতং ১
ব্রহ্মৈব তেন গন্তব্যং ব্রহ্মকর্ম্মসমাধিনা" ৮ ২৪ ॥ দৈবমেবাপরে যজ্ঞং যোগিনঃ পর্য্যুপাসতে ১ ব্রহ্মাগ্নাবপরে যজ্ঞং যজ্ঞেনৈবোপজুহ্বতি
॥ ২৫ ॥ শ্রোত্রাদীনীন্দ্রিয়াণ্যন্যে সংযমাগ্নিষু জুহ্বতি ১ শব্দাদীন্বিষয়ানন্য ইন্দ্রিয়াগ্নিষু জুহ্বতি ॥ ২৬ ॥

প্রাপ্যং নফলান্তরমিত্যর্থঃ ॥ ২৪ ॥ এবংভূতং যজ্ঞাত্মনা সংপাদিতং সর্ব্বত্র ব্রহ্মদর্শনলক্ষণং জ্ঞানং সর্ব্বযজ্ঞোপায়প্রাপ্যত্বাৎ সর্ব্বযজ্ঞেভ্যঃ শ্রেষ্ঠমিত্যেবং স্তোতুমধিকারিভেদেন জ্ঞানোপায়ভূতান্ বহূন্ যজ্ঞান্
আহ দৈবমেবেত্যাদি অষ্টভিঃ দেবা ইন্দ্রবরুণাদয়ো ইজ্যন্তে যস্মিন্নিতি দৈবো যজ্ঞঃ এবকারেণ ইন্দ্রাদিষু ব্রহ্মবুদ্ধিরাহিত্যং দর্শিতং তদ্দৈবং যজ্ঞং অপরে কর্ম্মযোগিনঃ পর্য্যুপাসতে শ্রদ্ধয়া কুর্ব্বন্তি
অপরে জ্ঞানযোগিনঃ ব্রহ্মরূপেঽগ্নৌ যজ্ঞেনোপায়েন ব্রহ্মার্পণমিত্যুক্তপ্রকারেণ যজ্ঞমুপজুহ্বতি যজ্ঞাদি সর্ব্বাণি কর্ম্মাণি প্রবিলাপয়ন্তীত্যর্থঃ সোয়ং জ্ঞানযজ্ঞঃ ॥ ২৫ ॥ কিঞ্চ
শ্রোত্রাদীনীতি অন্যে নৈষ্ঠিকব্রহ্মচারিণস্তদিন্দ্রিয়সংযমরূপেষ্বগ্নিষু শ্রোত্রাদীনি জুহ্বতি প্রবিলাপয়ন্তি ইন্দ্রিয়াণি নিরুধ্য সংযমপ্রধানাস্তিষ্ঠন্তীত্যর্থঃ ইন্দ্রিয়াণ্যেবাগ্নয়ঃ তেষু শব্দাদীনন্যে
গৃহস্থা জুহ্বতি বিষয়ভোগসময়েঽপ্যনাসক্তাঃ সন্তোঽগ্নিত্বেন ভাবিতেষ্বিন্দ্রিয়েষু হবিষ্ট্বেন ভাবিতান্ শব্দাদীন্ প্রক্ষিপন্তীত্যর্থঃ ॥ ২৬ ॥

সর্ব্বাণীতি : অপরে ধ্যাননিষ্ঠা বুদ্ধীন্দ্রিয়াণাং শ্রোত্রাদীনাং কর্ম্মাণি শ্রবণাদীনি : কর্ম্মেন্দ্রিয়াণাং বাক্‌পাণ্যাদীনাং কর্ম্মাণি বচনোপাদানাদীনি : প্রাণানাঞ্চ দশানাং কর্ম্মাণি প্রাণস্য বহির্গমনং : অপা
নস্যাধোনয়নং : ব্যানস্য ব্যানয়নং আকুঞ্চনপ্রসারণাদীনি : সমানস্যাশিতপীতাদিসমুন্নয়নং উদানস্যোর্দ্ধ্বনয়নং : উদ্গারে নাগ আখ্যাতঃ কূর্ম্ম উন্মীলনে স্মৃতঃ । কৃকরঃ ক্ষুৎকরো জ্ঞেয়ো দেবদত্তো বি
জৃম্ভনে ধনঞ্জয়ঃ স্থিতো দেহে সর্ব্বব্যাপী ধনঞ্জয় ইত্যেবং রূপাণি জুহ্বতি : আত্মনি সংযমো ধ্যানেকাগ্র্যং স এব যোগঃ স এবাগ্নিঃ : তস্মিন্ জ্ঞানেন ধ্যেয়বিষয়েণ : দীপিতে প্রজ্বলিতে : ধ্যেয়ং সম্যক্ জ্ঞাত্বা
তস্মিন্ মনঃ সংযম্য তানি সর্ব্বাণি কর্ম্মাণ্যুপরমযন্তীত্যর্থঃ ॥ ২৭ ॥ কিঞ্চ : দ্রব্যযজ্ঞা ইতি : দ্রব্যদানমেব যজ্ঞো যেষাং তে দ্রব্যযজ্ঞাঃ : কৃচ্ছ্রচান্দ্রায়ণাদি তপ এব যজ্ঞো যেষাং তে তপো

সর্ব্বাণীন্দ্রিয়কর্ম্মাণি প্রাণকর্ম্মাণি চাপরে । আত্মসংযমযোগাগ্নৌ জুহ্বতি জ্ঞানদীপিতে ॥ ২৭ ॥ দ্রব্যযজ্ঞাস্তপোযজ্ঞা যোগযজ্ঞাস্তথা
শ্রী২২ পরে । স্বাধ্যায়জ্ঞানযজ্ঞাশ্চ যতয়ঃ সংশিতব্রতাঃ ॥ ২৮ ॥ অপানে জুহ্বতি প্রাণং প্রাণেঽপানং তথাপরে । প্রাণাপানগতী রুদ্ধ্বা প্রা
ণায়ামপরায়ণাঃ ॥ ২৯ ॥

যজ্ঞাঃ । যোগশ্চিত্তবৃত্তিনিরোধলক্ষণঃ সমাধিঃ স এব যজ্ঞো যেষাং : তে যোগযজ্ঞাঃ স্বাধ্যায়েন বেদশ্রবণমননাদিনা যত্তদর্থজ্ঞানং স এব যজ্ঞো যেষাং তে : যদ্বা বেদপাঠযজ্ঞা
স্তদর্থজ্ঞানযজ্ঞাশ্চেতি দ্বিবিধাঃ : যতয়ঃ প্রযত্নশীলাঃ । সম্যক্ শিতং নিশিতং তীক্ষ্ণীকৃতং ব্রতং যেষাং ॥ ২৮ ॥ কিঞ্চ : অপান ইতি অপানে অধোবৃত্তৌ শ্রোত্র
প্রাণং হৃদ্বৃত্তিং পূরকেন জুহ্বতি : পূরককালে প্রাণমপানেনৈকীকুর্ব্বন্তি । তথা কুম্ভকেন প্রাণাপানয়োরূর্দ্ধ্বাধোগতী নিরুধ্য : রেচককালে অপানং প্রাণে জুহ্বতি :
এবং পূরককুম্ভকরেচকৈঃ প্রাণায়ামপরায়ণাঃ ॥ ২৯ ॥

অপরেত্বাহারসঙ্কোচমভ্যস্যন্তঃ স্বয়মেব জীর্য্যমাণেষ্বিন্দ্রিয়েষু তত্তদিন্দ্রিয়বৃত্তিং জুহ্বতি লয়ং ভাবয়ন্তীত্যর্থঃ ঃ যদ্বা ঃ অপানে জুহ্বতি প্রাণং প্রাণে২পানং চাপেক্ষ্য জীবনেন পূরককালে কায়াবয়বর্ত্তমানয়োঃ হংসঃ সোহমিত্য-
জপানাস্ত প্রতিলোমতস্তস্মিন্ হূয়মানেনাজপামন্ত্রেণ তত্ত্বং পদার্থৈক্যং ভাবয়ন্তীত্যর্থঃ ॥ তদুক্তং যোগশাস্ত্রে ঃ সকারেণ বহির্য্যাতি হকারেণ বিশেৎ পুনঃ ॥ প্রাণস্তত্র স এবাহং হংস ইতি চিন্তয়েদিতি ঃ প্রাণা-
পানগতী রুদ্ধ্বা তেন শ্বাসাকেন প্রাণায়ামযজ্ঞা পারকে মতং ঃ অয়মর্থঃ ঃ দ্বৌ ভাগৌ পূরয়েদন্নৈস্তোয়েনৈকং প্রপূরয়েৎ ॥ মারুতস্য প্রচারার্থং চতুর্থমবশেষয়েৎ ঃ ইত্যাদি বচনোক্ত নিয়তাহারা সো-
ঘাংও ঃ কুম্ভকেন প্রাণাপানগতী রুদ্ধ্বা প্রাণায়ামপরায়ণাঃ সন্তঃ প্রাণানিন্দ্রিয়াণি প্রাণেষু জুহ্বতি ঃ কুম্ভকে হি সর্ব্বে প্রাণা একীভবন্তি ঃ অতশ্চীয়মানেষ্বিন্দ্রিয়েষু হোমং ভাবয়ন্তীত্যর্থঃ ॥ তদুক্তং যো-
গশাস্ত্রে ঃ যথা যথা সদাভ্যাসান্মনসঃ স্থিরতা ভবেৎ ॥ বায়ুবাক্কায়দৃষ্টীনাং স্থিরতা চ তথা তথেতি ॥ ২৯ ॥ তদেবমুক্তানাং দ্বাদশানাং যজ্ঞবিদাং ফলমাহ ঃ সর্ব্ব ইতি ঃ যজ্ঞান্ বিদন্তি জানন্তীতি

অপরেনিয়তাহারাঃ প্রাণান্ প্রাণেষু জুহ্বতি ॥ ২৯ ॥ সর্ব্বেপ্যেতে যজ্ঞবিদো যজ্ঞক্ষপিতকল্মষাঃ ॥ যজ্ঞশিষ্টামৃতভুজো যান্তি ব্রহ্ম সনাতনং ॥ ৩০ ॥ নায়ং লো-
কোঽস্ত্যযজ্ঞস্য কুতোঽন্যঃ কুরুসত্তম ॥ এবং বহুবিধা যজ্ঞা বিততা ব্রহ্মণো মুখে ॥ কর্ম্মজান্ বিদ্ধি তান্ সর্ব্বানেবং জ্ঞাত্বা বিমো-
ক্ষ্যসে ॥ ৩১ ॥ শ্রেয়ান্ দ্রব্যময়াদ্যজ্ঞাজ্জ্ঞানযজ্ঞঃ পরন্তপ ॥ সর্ব্বং কর্ম্মাখিলং পার্থ জ্ঞানে পরিসমাপ্যতে ॥ ৩৩ ॥

যজ্ঞবিদো যজ্ঞবিদ ইতি বা ঃ যজ্ঞৈঃ ক্ষপিতং কল্মষং যৈঃ যজ্ঞান্ কৃত্বাবশিষ্টে কালে অবিহিতম অন্নং অমৃতরূপং ভুঞ্জত ইতি ঃ তথা সনাতনং নিত্যং ব্রহ্মজ্ঞানদ্বারেণ প্রাপ্নুবন্তি ॥ ৩০ ॥ তদকরণে দোষমাহ ঃ নায়মিতি অ-
য়মল্পসুখোপি মনুষ্যলোকো অযজ্ঞস্য যজ্ঞানুষ্ঠানরহিতস্য নাস্তি ঃ কুতঃ অন্যঃ পরলোকঃ ঃ অতো যজ্ঞাঃ সর্ব্বথা কর্ত্তব্যা ইত্যর্থঃ ঃ জ্ঞানযজ্ঞং স্তোতুমুপসংহরতি ঃ এবমিতি ঃ ব্রহ্মণো বেদস্য মুখে বি-
ততা বেদেন সাক্ষাদুক্তা ইত্যর্থঃ ঃ তথাপি তান্ সর্ব্বান্ বাঙ্মনঃকায়কর্ম্মজনিতান্ আত্মস্বরূপসম্পর্শরহিতান্ বিদ্ধি জানীহি ঃ আত্মনঃ কর্ম্মাগোচরত্বাৎ ঃ এবং জ্ঞাত্বা জ্ঞাননিষ্ঠঃ সংসারাদ্বিমো-
ক্ষ্যসি ॥ ৩১ ॥ জ্ঞানযজ্ঞস্য শ্রেষ্ঠত্বমাহ ঃ শ্রেয়ানিতি ঃ দ্রব্যময়াৎ অনাত্মব্যাপারজন্যাদ্দৈবাদিযজ্ঞাৎ জ্ঞানযজ্ঞঃ শ্রেষ্ঠঃ ঃ যদ্যপি জ্ঞানস্যাপি মনোব্যাপারাধীনত্বমস্ত্যেব ঃ তথাপি আত্মস্বরূপস্য জ্ঞানস্য
মনঃপরিণামে অভিব্যক্তিমাত্রং ন তু জন্যত্বমিতি দ্রব্যময়াদ্বিশেষঃ শ্রেষ্ঠত্বে হেতুঃ সর্ব্বং কর্ম্মাখিলং ফলসহিতং জ্ঞানে পরিসমাপ্যতে ঃ অন্তর্ভবতীত্যর্থঃ ঃ সর্ব্বং তদভিসমেতি যৎকিঞ্চিৎ প্রজাঃ সাধু কুর্ব্বন্তীতি শ্রুতেঃ ॥ ৩৩ ॥

এবংভূতাত্মজ্ঞানে সাধনমাহ তদ্বিদ্ধীতি : তজ্জ্ঞানং বিদ্ধি জানীহি প্রাপ্নুহি : জ্ঞানিনাং প্রণিপাতেন দণ্ডবন্নমস্কারেণ : ততঃ পরিপ্রশ্নেন কুতোঽয়ং মম সংসারঃ কথং বা নিবর্ত্তেত ইতি প্রশ্নেন : সেবয়া গুরুশুশ্রূষয়া চ জ্ঞানি-
নঃ শাস্ত্রজ্ঞাস্তত্ত্বদর্শিনঃ অপরোক্ষানুভবসম্পন্নাশ্চ : তে তুভ্যং জ্ঞানমুপদেশেন সম্পাদয়িষ্যন্তি ॥৩৪॥ জ্ঞানফলমাহ যজ্জ্ঞাত্বেতি সার্দ্ধৈস্ত্রিভিঃ : যজ্জ্ঞানং জ্ঞাত্বা প্রাপ্য পুনর্বন্ধুবধাদিনিমিত্তং মোহং ন
প্রাপ্স্যসি : তদাহ তু(?) যেন জ্ঞানেন ভূতানি পিতৃপুত্রাদীনি স্বাবিদ্যাবিজৃম্ভিতানি : স্বাত্মন্যেবাভেদেন দ্রক্ষ্যসি : অথো অনন্তরং আত্মানমপি : ময়ি পরমাত্মন্যভেদেন দ্রক্ষ্যসীত্যর্থঃ ॥৩৫॥ কিঞ্চ অ-
পি চেদিতি : সর্ব্বেভ্যঃ পাপকারিভ্যোঽপি যদ্যপ্যতিশয়পাপকারী ত্বমসি : তথাপি সর্ব্বং পাপসমুদ্রং জ্ঞানপ্লবেন সম্যগনায়াসেন তরিষ্যসি ॥৩৬॥ সমুদ্রবদ্দুস্তরস্যাপি পাপস্যাতিনষ্টঘীমাহ : নত

তদ্বিদ্ধি প্রণিপাতেন পরিপ্রশ্নেন সেবয়া । উপদেক্ষ্যন্তি তে জ্ঞানং জ্ঞানিনস্তত্ত্বদর্শিনঃ ॥৩৪॥ যজ্জ্ঞাত্বা ন পুনর্মোহম্ (এবং) যাস্যসি পাণ্ডব ২
যেন ভূতান্যশেষেণ দ্রক্ষ্যস্যাত্মন্যথো ময়ি ॥৩৫॥ অপি চেদসি পাপেভ্যঃ সর্ব্বেভ্যঃ পাপকৃত্তমঃ । সর্ব্বং জ্ঞানপ্লবেনৈব বৃজিনং সন্ত-
গী ১৭ রিষ্যসি ॥৩৬॥ যথৈধাংসি সমিদ্ধোঽগ্নির্ভস্মসাৎ কুরুতেঽর্জ্জুন । জ্ঞানাগ্নিঃ সর্ব্বকর্ম্মাণি ভস্মসাৎ কুরুতে তথা ॥৩৭॥
ন হি জ্ঞানেন সদৃশং পবিত্রমিহ বিদ্যতে । তৎ স্বয়ং যোগসংসিদ্ধঃ কালেনাত্মনি বিন্দতি ॥৩৮॥

পাপস্য নাশত্বে বিপ্রতিপত্তিং দৃষ্টান্তেনোপপাদয়ন্নাহ যথেতি । এধাংসি কাষ্ঠানি প্রদীপ্তোঽগ্নির্যথা ভস্মীভাবং নয়তি : তথাত্মজ্ঞানরূপোঽগ্নিঃ প্রারব্ধকর্ম্মফলব্যতিরিক্তানি
কর্ম্মাণি ভস্মীকরোতীত্যর্থঃ ॥৩৭॥ অত্র হেতুমাহ : নহীতি পবিত্রং শুদ্ধিকরং তপোযোগাদিষু মধ্যে জ্ঞানতুল্যং নাস্তি : তর্হি সর্ব্বেঽপ্যাত্মজ্ঞানমেব কিমি-
তি নাভ্যসন্তীত্যাহ : তৎ স্বয়মিতি সার্দ্ধেন তৎ আত্মবিষয়জ্ঞানং কালেন মহতা কর্ম্মযোগেন সংসিদ্ধো যোগ্যতাং প্রাপ্তঃ সন্ স্বয়মেবানায়াসেন লভতে : ন তু কর্ম্মযোগং বিনেত্যর্থঃ ॥৩৮॥

শ্রদ্ধায়ামপি

কিঞ্চ শ্রদ্ধাবানিতি শ্রদ্ধাবান্ গুরূপদিষ্টেঽর্থে আস্তিক্যবুদ্ধিমান্ তৎপরস্তদেকনিষ্ঠঃ সংযতেন্দ্রিয়শ্চ জ্ঞানং লভতে নান্যঃ অতঃ শ্রদ্ধাদিসম্পত্ত্যা জ্ঞানলাভাৎ প্রাক্ কর্মযোগ এব চিত্তশুদ্ধ্যর্থমনুষ্ঠেয়ঃ জ্ঞান
লাভানন্তরন্তু ন তস্য কিঞ্চিৎ কৃত্যমস্তীত্যাহ জ্ঞানং লব্ধ্বেতি মোক্ষমচিরেণ প্রাপ্নোতি ॥ ৩৯ ॥ জ্ঞানাধিকারিণমুক্ত্বা তদ্বিপরীতমনধিকারিণমাহ অজ্ঞশ্চেতি অজ্ঞো গুরূপদিষ্টার্থানভিজ্ঞঃ
কথঞ্চিজ্জ্ঞানে জাতেঽপ্যশ্রদ্দধানশ্চ জাতায়ামপি মমেদং সিদ্ধ্যেন্ন বেতি সংশয়াক্রান্তচিত্তশ্চ বিনশ্যতি স্বার্থাদ্ভ্রশ্যতি এতেষু ত্রিষ্বপি সংশয়াত্মা সর্বথা নশ্যতি যতস্তস্যায়ং লোকো নাস্তি ধনার্জ
নবিবাহাদ্যসিদ্ধেঃ ন চ পরো লোকঃ ধর্মস্যানিষ্পত্তেঃ ন চ সুখং সংশয়েনৈব ভোগস্যাপ্যসম্ভবাৎ ॥ ৪০ ॥ অধ্যায়দ্বয়োক্তাং পূর্বাপরভূমিকাভেদেন কর্মজ্ঞানময়ীং দ্বিবিধাং ব্রহ্মনিষ্ঠামুপ

শ্রদ্ধাবাঁল্লভতে জ্ঞানং তৎপরঃ সংযতেন্দ্রিয়ঃ । জ্ঞানং লব্ধ্বা পরাং শান্তিমচি রেণাধিগচ্ছতি ॥ ৩৯ ॥ অজ্ঞশ্চাশ্রদ্দধানশ্চ সংশয়াত্মা বিনশ্যতি ২

নায়ং লোকোঽস্তি ন পরো ন সুখং সংশয়াত্মনঃ ॥ ৪০ ॥ যোগসংন্যস্তকর্মাণং জ্ঞানসংছিন্নসংশয়ং । আত্মবন্তং ন কর্মাণি নিবধ্নন্তি ধনঞ্জয় ॥ ৪১ ॥

তস্মাদজ্ঞানসম্ভূতং হৃৎস্থং জ্ঞানাসিনাত্মনঃ । ছিত্ত্বৈনং সংশয়ং যোগমাতি ষ্ঠোত্তিষ্ঠ ভারত ॥ ৪২ ॥ ইতি শ্রীভগবদ্গীতাসূপনিষৎসু চতুর্থোঽধ্যায়ঃ ॥ * ॥

সংহরতি যোগেতি দ্বাভ্যাং যোগেন পরমেশ্বরারাধনরূপেণ তস্মিন্ সংন্যস্তানি কর্মাণি যেন তং কর্মাণি স্বফলৈর্ন নিবধ্নন্তি ততো জ্ঞানেনাত্মাবোধেন সংছিন্নঃ সংশয়ো দেহাদ্যভিমানলক্ষ
ণো যস্য তং অতএবাপ্রমত্তমপ্রমাদিনং কর্মাণি লোকসংগ্রহার্থানি স্বাভাবিকানি বা ন নিবধ্নন্তি ॥ ৪১ ॥ যস্মাদেবং তস্মাদিতি আত্মনো হ্যজ্ঞানেন সম্ভূতং হৃদি স্থিতমেনং সংশয়ং শোকাদিনিমিত্তং দেহা
দ্যবিবেকজ্ঞানমেবাসিঃ খড্গঃ তেন ছিত্ত্বা কর্মযোগমাশ্রয় তত্র প্রথমং প্রস্তুতায় যুদ্ধায়োত্তিষ্ঠ ভারতেতি ক্ষত্রিয়স্য যুদ্ধং স্বধর্ম ইতি দর্শিতং ॥ ০ ॥ প্রসঙ্গাবস্থাভেদেন কর্মজ্ঞা
নময়ী দ্বিধা নিষ্ঠোক্তা যেন তং বন্দে শৌরিং সংশয়চ্ছিদং ॥ ইতি গীতাটীকায়াং চতুর্থোঽধ্যায়ঃ ॥ * ॥ * ॥ ওঁ নমঃ শিবায় ॥ * ॥

কর্ম্মযোগোপায়ভূতোজ্ঞানযোগশ্চ প্রপঞ্চিতঃ । পঞ্চমেতু তয়োর্ন্যায়েন যোগোন্যাসোনিরূপ্যতে ॥১॥ অজ্ঞানসংশয়ংজ্ঞানাসিনা ছিত্ত্বা কর্ম্মযোগমতিষ্ঠোত্তিষ্ঠেত্যুক্তং : তত্র পূর্ব্বাপরবিরোধং মন্বানো
অর্জ্জুন উবাচ : সংন্যাসমিতি : যস্ত্বাত্মরতিরেব স্যাদিত্যাদিনা : সর্ব্বং কর্ম্মাখিলং পার্থেত্যাদিনা চ জ্ঞানিনঃ সংন্যাসং কথয়সি : জ্ঞানাসিনা সংশয়ং ছিত্ত্বা কর্ম্মযোগমাতিষ্ঠেতি পুনর্যোগঞ্চ
কথয়সি : ন চ সংন্যাসকর্ম্মযোগয়োরেকদা একস্য সম্ভবতি : বিরুদ্ধস্বরূপত্বাৎ : তস্মাদেতয়োর্মধ্যে একস্মিন্ননুষ্ঠাতব্যে যৎ শ্রেয়স্তন্নিশ্চিত্য মে একং বদ ॥ ১ ॥ অত্রোত্তরং শ্রীভগবানু-
বাচ : অয়মর্থঃ ন হি বেদান্তবেদ্যাত্মতত্ত্বজ্ঞং প্রতি কর্ম্মযোগং ব্রবীমি : যতঃ পূর্ব্বোক্তেন সংন্যাসেন সহ বিরোধঃ স্যাৎ : দেহাভিমানীনং বন্ধুবধনিমিত্তশোকমোহাদিকৃতমনংসংশয়ং দেহাত্মবি-

অর্জ্জুন উবাচ ॥ সংন্যাসং কর্ম্মণাং কৃষ্ণ পুনর্যোগঞ্চ শংসসি ॥ যচ্ছ্রেয় এ তয়োরেকং তন্মে ব্রূহি সুনিশ্চিতং ॥ ১ ॥ শ্রীভগবানুবাচ ॥ সংন্যাসঃ কর্ম্ম-
গী ২৪ যোগশ্চ নিঃশ্রেয়সকরাবুভৌ । তয়োস্তু কর্ম্মসংন্যাসাৎ কর্ম্মযোগো বিশিষ্যতে ॥ ২ ॥ জ্ঞেয়ঃ স নিত্যসংন্যাসী যো ন দ্বেষ্টি ন কাঙ্ক্ষতি
নির্দ্বন্দ্বো হি মহাবাহো সুখং বন্ধাৎ প্রমুচ্যতে ॥ ৩ ॥ ৩ ॥ ০ ॥ ০ ॥ ০ ॥ ০ ॥

বেকজ্ঞানাসিনাচ্ছিত্ত্বা : পরমাত্মজ্ঞানোপায়ত্বং কর্ম্মযোগং ব্রবীমি । কর্ম্মযোগেন শুদ্ধচিত্তস্য চাত্মতত্ত্বজ্ঞানে জাতে সতি তৎপরিপাকার্থং জ্ঞাননিষ্ঠাঙ্গত্বেন সংন্যাসঃ পূর্ব্বোক্তঃ । এবঞ্চ সতি কপ্রধান
যোগ্যকল্পযোগাৎ : সংন্যাসঃ কর্ম্মযোগশ্চেত্যেতাবুভাবপি স্বভূমিকাভেদেন সম্প্রতিপাদ্যেব নিঃশ্রেয়সং সাধয়তঃ তথাপি তয়োর্মধ্যে কর্ম্মসংন্যাসাৎ কর্ম্মযোগো বিশিষ্টো ভবতি ॥ ২ ॥ ২ ॥
অজ্ঞাতস্য সাধকস্য সংন্যাসিত্বেন কর্ম্মযোগিনং স্তুবন্ তস্য শ্রেষ্ঠত্বং দর্শয়তি জ্ঞেয় ইতি : রাগদ্বেষরাহিত্যেন পরমেশ্বরার্থং কর্ম্মাণি যোঽনুতিষ্ঠতি : স নিত্যং কর্ম্মানুষ্ঠানকালেপি সংন্যাসীত্যেবং জ্ঞেয়ঃ : অত্র হেতু-
ঃ নির্দ্বন্দ্বঃ রাগদ্বেষাদিদ্বন্দ্ব শূন্যো হি শুদ্ধচিত্তো জ্ঞানদ্বারা সুখমনায়াসেন সংসারাৎ প্রমুচ্যতে ॥ ৩ ॥ ওঁনমঃশীরায়

যস্মাদেবমঙ্গপ্রধানত্বেনোভয়োরবস্থাভেদেন ক্রমসমুচ্চয়ঃ অতো বিকল্পমঙ্গীকৃত্যোভয়োঃ কঃ শ্রেষ্ঠ ইতি প্রশ্নো হ্যজ্ঞানিনামেবোচিতো ন বিবেকিনামিত্যাহ সাংখ্যযোগাবিতি : সাংখ্যশব্দেন জ্ঞাননিষ্ঠাবাচিনা তদঙ্গং
সংন্যাসং লক্ষয়তি : সংন্যাসকর্মযোগাবেকফলৌ পৃথক্ স্বতন্ত্রাবিতি : বালা অজ্ঞাঃ প্রবদন্তি অত্র হেতুঃ একমপি সম্যগাস্থিত আশ্রিতবানুভয়োঃ ফলং প্রাপ্নোতি : তথাহি কর্মযোগং সম্যগনুতিষ্ঠন্ শুদ্ধচিত্তঃ সন্ জ্ঞা-
নদ্বারা যদুভয়োঃ ফলং কৈবল্যং তদ্বিন্দতি : সংন্যাসং সম্যগাস্থিতোপি পূর্বমনুষ্ঠিতস্য কর্মযোগস্যাপি পরম্পরয়া যৎ ফলং কৈবল্যং তদ্বিন্দতীতি নপৃথক্‌ফলমনয়োরিত্যর্থঃ ॥ ৪ ॥ এতদেব স্ফুটয়তি যদিতি :
সাংখ্যৈঃ জ্ঞাননিষ্ঠৈঃ সংন্যাসিভিঃ যৎ স্থানং মোক্ষাখ্যং প্রকর্ষেণ সাক্ষাদবাপ্যতে : যোগৈরিত্যত্রার্শআদিত্বান্মত্বর্থীয়োঽচ্প্রত্যয়ো দ্রষ্টব্যঃ : কর্মযোগিভিরপি তদেব জ্ঞানদ্বারেণ গম্যতে : প্রাপ্যত ইত্যর্থঃ :

সাংখ্যযোগৌ পৃথগ্বালাঃ প্রবদন্তি ন পণ্ডিতাঃ ॥ ২ ৭ একমপ্যাস্থিতঃ সম্যগুভয়োর্বিন্দতে ফলং ॥ ৪ ॥
যৎ সাংখ্যৈঃ প্রাপ্যতে স্থানং তদ্যোগৈরপি গম্যতে ॥ ২ ৭ একং সাংখ্যঞ্চ যোগঞ্চ যঃ পশ্যতি স পশ্যতি ॥ ৫ ॥
সংন্যাসস্তু মহাবাহো দুঃখমাপ্তুমযোগতঃ ॥ ২ বা যোগযুক্তো মুনির্ব্রহ্ম নচিরেণাধিগচ্ছতি ॥ ৬ ॥

অতঃ সাংখ্যঞ্চ যোগঞ্চ একফলত্বেন একং যঃ পশ্যতি স এব সম্যক্ পশ্যতি ॥ ৫ ॥ যদি কর্মযোগিনোপ্যন্ততঃ সংন্যাসেনৈব জ্ঞাননিষ্ঠা : তর্হ্যাদিত এব সংন্যাসঃ
কর্তুং যুক্ত ইতি মন্বানং প্রত্যাহ : সংন্যাসস্ত্বিতি : অযোগতঃ কর্মযোগং বিনা সংন্যাসঃ প্রাপ্তুং দুঃখং দুঃখহেতুঃ অশক্য ইত্যর্থঃ : চিত্তশুদ্ধ্যভাবেন জ্ঞাননিষ্ঠায়া অসম্ভবাৎ : যোগযুক্তস্তু শুদ্ধচিত্ত-
তয়া মুনিঃ সংন্যাসী ভূত্বা : অচিরেণৈব ব্রহ্মাধিগচ্ছতি : অপরোক্ষং জানাতি : অতঃ চিত্তশুদ্ধেঃ প্রাক্ কর্মযোগ এব । সংন্যাসাদ্বিশিষ্যত ইতি পূর্বোক্তং : তদুক্তং বার্তিককৃদ্ভিঃ
প্রমাদিনো বহিশ্চিত্তাঃ পিশুনাঃ কলহোৎসুকাঃ সংন্যাসিনোপি দৃশ্যন্তে দৈবসন্দূষিতাশয়া ইতি ॥ ৬ ॥

কর্ম্মযোগাদিক্রমেণ ব্রহ্মাধিগমমুক্তং তত্র প্রবৃত্তেন কর্ম্মণা বন্ধঃ স্যাদেবেত্যাশঙ্ক্যাহ যোগযুক্ত ইতি। যোগেন যুক্তঃ অতো বিশুদ্ধ আত্মা চিত্তং যস্য অতএব বিজিত আত্মা শরীরং যেন অতএব জিতানি ইন্দ্রিয়াণি যেন। ততঃ সর্ব্বেষাং ভূতানাম্ আত্মভূত আত্মা যস্য সঃ লোকসংগ্রহার্থং স্বাভাবিকং বা কর্ম্ম কুর্ব্বন্নপি ন লিপ্যতে ॥ ৭ ॥ কুর্ব্বন্নপি ন লিপ্যত ইতি বিরুদ্ধমিত্যাশঙ্ক্য কর্ত্তৃত্বাভিমানাভাবান্ন বিরুদ্ধমিত্যাহ নৈব কিঞ্চিদিত্যাদি। কর্ম্মযোগেন যুক্তঃ ক্রমেণ তত্ত্ববিৎ দর্শনশ্রবণাদীনি কুর্ব্বন্নপি ইন্দ্রিয়াণীন্দ্রিয়ার্থেষু বর্ত্তন্ত ইতি ধারয়ন্ বুদ্ধ্যা নিশ্চিন্বন্ কিঞ্চিদপি অহং ন করোমীতি মন্যেত। তত্র দর্শনশ্রবণস্পর্শনঘ্রাণাশনানি চক্ষুরাদিজ্ঞানেন্দ্রিয়ব্যাপারাঃ। গতিঃ পাদয়োঃ। স্বাপো বুদ্ধেঃ। শ্বাসঃ প্রাণস্য। প্রলপনং বাগিন্দ্রিয়স্য। বিসর্গঃ পায়ূপস্থয়োঃ। উন্মিষ

যোগযুক্তো বিশুদ্ধাত্মা বিজিতাত্মা জিতেন্দ্রিয়ঃ। সর্ব্বভূতাত্মভূতাত্মা কুর্ব্বন্নপি ন লিপ্যতে ॥ ৭ ॥ নৈব কিঞ্চিৎ করোমীতি
শ্রীঃ যুক্তো মন্যেত তত্ত্ববিৎ। পশ্যন্ শৃণ্বন্ স্পৃশন্ জিঘ্রন্নশ্নন্ গচ্ছন্ স্বপন্ শ্বসন্ ॥ ৮ ॥ প্রলপন্ বিসৃজন্ গৃহ্ণন্নুন্মিষন্নি
মিষন্নপি। ইন্দ্রিয়াণীন্দ্রিয়ার্থেষু বর্ত্তন্ত ইতি ধারয়ন্ ॥ ৯ ॥ ব্রহ্মণ্যাধায় কর্ম্মাণি সঙ্গং ত্যক্ত্বা করোতি যঃ।
লিপ্যতে ন স পাপেন পদ্মপত্রমিবাম্ভসা ॥ ১০ ॥ কায়েন মনসা বুদ্ধ্যা কেবলৈরিন্দ্রিয়ৈরপি। যোগিনঃ কর্ম্ম কুর্ব্বন্তি সঙ্গং ত্যক্ত্বাত্মশুদ্ধয়ে ॥ ১১ ॥

নিমিষণে কূর্ম্মাখ্যপ্রাণস্যেতি বিবেকঃ। এতানি কর্ম্মাণি কুর্ব্বন্নপি অভিমানাভাবাদ্ ব্রহ্মবিন্ন লিপ্যতে তথা চ পারমর্ষং সূত্রং তদধিগম উত্তরপূর্ব্বাঘয়োরশ্লেষবিনাশৌ তদ্ব্যপদেশাদিতি ॥ ৯ ॥ তর্হি যস্য করোমীত্যভিমানোঽস্তি তস্য কর্ম্মলেপো দুর্ব্বারঃ অশুদ্ধচিত্তত্বাৎ সন্ন্যাসোঽপি নাস্তীতি মহাসঙ্কটমাপন্নমিত্যাশঙ্ক্যাহ ব্রহ্মণীতি। ব্রহ্মণি পরমেশ্বরে আধায় সমর্প্য তৎফলে সঙ্গং ত্যক্ত্বা যঃ কর্ম্মাণি করোতি অসৌ পাপেন পাপফলেন ন লিপ্যতে যথা পদ্মপত্রম্ অম্ভসি স্থিতমপি অম্ভসা ন লিপ্যতে তদ্বৎ ॥ ১০ ॥ বন্ধকত্বাভাবমুক্ত্বা মোক্ষহেতুত্বং সদাচারেণ দর্শয়তি কায়েনেতি। কায়েন স্নানাদি। মনসা ধ্যানাদি। বুদ্ধ্যা তত্ত্বনিশ্চয়াদি। কেবলৈঃ কর্ম্মাভিনিবেশরহিতৈরিন্দ্রিয়ৈঃ শ্রবণকীর্ত্তনাদি নমস্কারং কর্ম্মফলসঙ্গং ত্যক্ত্বা চিত্তশুদ্ধয়ে কর্ম্মযোগিনঃ কর্ম্ম কুর্ব্বন্তি ॥ ১১ ॥ ওঁ নমঃ শিবায় ॥

যস্মাদেবং তস্মাৎ প্রযোজকোঽপি সন্ প্রভুঃ কস্যচিৎ পাপং সুকৃতং নাদত্তে ন ভজতে আপ্তকামত্বাৎ বিভুঃ পরিপূর্ণঃ আপ্তকামত্বাদিত্যর্থঃ : যদি হি স্বার্থকামনয়া কারয়েত্তর্হি তথা স্যাৎ ন ত্বেতদস্তি আপ্তকামস্যৈব বাঞ্ছামাত্রমায়য়া তৎপূর্ব্বকর্মাত্র সাক্ষ্যেণ প্রবর্ত্তকত্বাৎ ২ নন্বজ্ঞানগ্রস্তস্য তত্ত্বতো নিঃস্পৃহতা বৈষম্যাপত্তেঃ কথমাপ্তকামত্বং জীবস্য তত্রাহ : অজ্ঞানেনেতি নিগ্রহোদ্দণ্ড ফলা হন্তস্য স্বরূপ জীবেষু অজ্ঞানেন সর্ব্বস্মৃতমঃ পরমেশ্বরস্য জ্ঞানং স্বরূপজ্ঞা নমাবৃতং তেন হেতুনা জন্তবো জীবা মুহ্যন্তি : বৈষম্যং মন্যন্ত ইত্যর্থঃ ॥ ১৫ ॥ জ্ঞানিনস্তু ন মুহ্যন্তীত্যাহ : জ্ঞানেনেতি আত্মনো ভগবতো জ্ঞানেন যেষাং বৈষম্যাপাদকমজ্ঞানং নাশিতং । তেষামজ্ঞানং নাশয়িত্বা তৎ জ্ঞানং পরং পরিপূর্ণমীশ্বরস্বরূপং প্রকাশয়তি : যথাদিত্যস্তমো নিরস্য সমস্তং বস্তুজাতং প্রকাশয়তি তদ্বৎ ॥ ১৬ ॥ এবম্ভূতেশ্বরস্যোপাসকানাং ফলমাহ তদ্বুদ্ধয় ইতি ॥

নাদত্তে কস্যচিৎ পাপং ন চৈব সুকৃতং বিভুঃ । অজ্ঞানেনাবৃতং জ্ঞানং তেন মুহ্যন্তি জন্তবঃ ॥ ১৫ ॥ জ্ঞানেন তু তদজ্ঞানং যেষাং নাশিতম্

গীঃ ২৫ আত্মনঃ । তেষামাদিত্যবজ্জ্ঞানং প্রকাশয়তি তৎ পরং ॥ ১৬ ॥ তদ্বুদ্ধয়স্তদাত্মানস্ত-

ন্নিষ্ঠাস্তৎপরায়ণাঃ । গচ্ছন্ত্যপুনরাবৃত্তিং জ্ঞাননির্ধূতকল্মষাঃ ॥ ১৭ ॥ বিদ্যাবিনয়সম্পন্নে

ব্রাহ্মণে গবি হস্তিনি । শুনি চৈব শ্বপাকে চ পণ্ডিতাঃ সমদর্শিনঃ ॥ ১৮ ॥ ওঁ রামায় নমঃ ॥

তস্মিন্নেব বুদ্ধির্নিশ্চয়াত্মিকা যেষাং তস্মিন্নেবাত্মা প্রযত্নো যেষাং তস্মিন্নেব নিষ্ঠা তাৎপর্য্যং যেষাং তদেব পরময়নো যেষাং ২ ততস্তৎপ্রসাদলব্ধেনাত্মজ্ঞানেন নির্দ্ধূতং নিরস্তং কল্মষং যেষাং তে অপুনরাবৃত্তিং মুক্তিং যান্তি ॥ ১৭ ॥ কিঞ্চ তে জ্ঞানিনঃ যেঽপুনরাবৃত্তিং গচ্ছন্তীত্যপেক্ষায়ামাহ : বিদ্যাবিনয়েতি ২ বিষমেষ্বপি সমং ব্রহ্মৈব দ্রষ্টুং শীলং যেষাং তে পণ্ডিতা জ্ঞানিন ইত্যর্থঃ ২ অত্র বিদ্যাবিনয়াভ্যাং যুক্তে ব্রাহ্মণে গবি হস্তিনি চ শুনি চ শ্বপাকে চ ইতি তস্মিন্নিতি কর্ম্মণা বৈষম্যং : গবি হস্তিনি চেতি জাতিতো বৈষম্যং দর্শিতং ॥ ১৮ ॥

ননু কথং তেনৈব কর্ম্মণা কশ্চিন্মুচ্যতে কশ্চিদ্বধ্যত ইতি ব্যবস্থা : অত আহ যুক্ত ইতি : যুক্তঃ পরমেশ্বরৈকনিষ্ঠঃ সন্ : কর্ম্মণাং ফলং ত্যক্ত্বা কর্ম্মাণি কুর্ব্বন্নাত্যন্তিকং শান্তিং মোক্ষং প্রাপ্নোতি : অযুক্তস্তু ব
হির্ম্মুখঃ : কামকারেণ কামতঃ প্রবৃত্ত্যা ফলে সক্তো নিতরাং বন্ধং প্রাপ্নোতি ॥ ১২ ॥ এবং তাবৎ চিত্তশুদ্ধিশূন্যস্য সংন্যাসাৎ কর্ম্মযোগো বিশিষ্যতে ইত্যেতৎ প্রপঞ্চিতং : ইদানীং শুদ্ধ
চিত্তস্য সংন্যাসঃ শ্রেষ্ঠ ইত্যাহ : সর্ব্বকর্ম্মাণি : বশী জিতচিত্তঃ : সর্ব্বাণি কর্ম্মাণি বিক্ষেপকানি : মনসা বিবেকযুক্তেন সংন্যস্য সুখং যথা ভবতি এবং জ্ঞাননিষ্ঠঃ সন্নাস্তে : ক্বাস্তে ইত্যত আহ
নবদ্বার ইতি : নবদ্বারে নেত্রে নাসিকে কর্ণৌ মুখঞ্চেতি সপ্ত শিরোগতানি : অধোগতে দ্বে পায়ূপস্থে : তান্যেবং নবদ্বারাণি যস্মিন্ পুরে : পুরবদহঙ্কারশূন্যে দেহে দেহী তিষ্ঠতি : অ

যুক্তঃ কর্ম্মফলং ত্যক্ত্বা শান্তিমাপ্নোতি নৈষ্ঠিকীং । অযুক্তঃ কামকারেণ ফলে সক্তো নিবধ্যতে ॥ ১২ ॥ সর্ব্বকর্ম্মাণি মনসা সংন্যস্যাস্তে সুখং বশী
। নবদ্বারে পুরে দেহী নৈব কুর্ব্বন্ন কারয়ন্ ॥ ১৩ ॥ ন কর্ত্তৃত্বং ন কর্ম্মাণি লোকস্য সৃজতি প্রভুঃ । ন কর্ম্ম
ফলসংযোগং স্বভাবস্তু প্রবর্ত্ততে ॥ ১৪ ॥ নাদত্তে কস্যচিৎ পাপং ন চৈবং সুকৃতং বিভুঃ ।
। অজ্ঞানেনাবৃতং জ্ঞানং তেন মুহ্যন্তি জন্তবঃ ॥ ১৫ ॥ ॥

হঙ্কারবান্ : এবং স্বয়ং তেনৈব দেহেন নৈব কুর্ব্বন্ মমকারাভাবাচ্চ : ন কারয়ন্ বিশুদ্ধচিত্তো ভবতীত্যর্থঃ : অশুদ্ধচিত্তো হি সংন্যস্য পুনঃ করোতি কারয়তি : ন তু যন্তথা : অতঃ শ্রেষ্ঠমাস্ত ইত্যর্থঃ
॥ ১৩ ॥ ননু পরমেশ্বর এব সাধুকর্ম্ম কারয়তি যমেভ্যো লোকেভ্য উন্নিনীষতে : এষ এবাসাধু কর্ম্ম কারয়তি যমধো নিনীষতে ইত্যাদিশ্রুতেঃ । পরমেশ্বরেণৈব শুভাশুভফলেষু কর্ম্মসু কর্ত্তৃত্বেন প্রযুজ্যমা
নো হ্যস্বতন্ত্রঃ পুরুষঃ : কথং তানি কর্ম্মাণি ত্যজেৎ : ঈশ্বরেণৈবজ্ঞানমার্গে প্রযুজ্যমানস্ত্যক্ষ্যতি : ইতি চেৎ : এবং সতি বৈষম্যনৈর্ঘৃণ্যাভ্যাং প্রযোজককর্ত্তৃত্বাদীশ্বরস্যাপি পুণ্যপাপসম্বন্ধঃ স্যাদিত্যাশঙ্ক্যাহ ন কর্ত্তৃত্বমিতি :
প্রভুরীশ্বরো জীবলোকস্য কর্ত্তৃত্বাদিকং ন সৃজতি : কিন্তু জীবস্য স্বভাব এব কর্ত্তৃত্বাদিরূপেণ প্রবর্ত্ততে : অনাদ্যবিদ্যাকামবাসাপ্রবৃত্তিস্বভাবমেব লোকমীশ্বরঃ কর্ম্মসু নিযুঙ্‌ক্তে ন তু স্বয়মেব কর্ত্তৃত্বাদিকমুৎপাদয়তীত্যর্থঃ ॥ ১৪ ॥

বিষমায় চ সমপ্রকারকরণে সতি

নন্বিষমেষ্বপি সমদর্শনং নিষিদ্ধং কথন্তে পণ্ডিতাঃ । যথাহ গৌতমঃ সমাসমাভ্যাং বিষমসমে পূজাত ইতি । অস্যায়মর্থঃ সমায় পূজয়া বিষমপ্রকারকরণে সতি সমপূজকত্বে ইহলোকাৎ পর-
লোকাচ্চ হীয়তে ইতি । অত্রাহ ইহৈবেতি । ইহৈব জীবদ্ভিরেব তৈঃ সর্গঃ সংসারো জিতঃ নিরস্তঃ কৈঃ । যেষাং মনঃ সাম্যে সমত্বে স্থিতং । তত্র হেতুঃ হি যস্মাদ্ব্রহ্ম সমং নির্দোষঞ্চ
তস্মাত্তে সমদর্শিনো ব্রহ্মণ্যেব স্থিতাঃ ব্রহ্মভাবং প্রাপ্তাঃ ॥ গৌতমোক্তো দোষস্তু ব্রহ্মভাবাপ্রাপ্তেঃ পূর্বমেব পূজাত ইতি পূজাকারণপ্রকরণাৎ ॥ ১৯ ॥ ব্রহ্মভাবপ্রাপ্তস্য লক্ষণমাহ
নপ্রহৃষ্যেদিতি । ব্রহ্মবিদ্ভূত্বা ব্রহ্মণ্যেবস্থিতো যঃ স প্রিয়ং প্রাপ্য ন হৃষ্যতি । অপ্রিয়ং প্রাপ্য নোদ্বিজেৎ ন বিষীদতীত্যর্থঃ যতঃ স্থিরবুদ্ধিঃ স্থিরা নিশ্চলা বুদ্ধির্যস্য যতঃ অসংমূঢ়

ইহৈব তৈর্জিতঃ সর্গো যেষাং সাম্যে স্থিতং মনঃ । নির্দোষং হি সমং ব্রহ্ম তস্মাদ্ব্রহ্মণি তে স্থিতাঃ ॥ ১৯ ॥ ন প্রহৃষ্যেৎ প্রিয়ং প্রাপ্য নো-
দ্বিজেৎ প্রাপ্য চাপ্রিয়ং । স্থিরবুদ্ধিরসংমূঢ়ো ব্রহ্মবিদ্ব্রহ্মণি স্থিতঃ ॥ ২০ ॥ বাহ্যস্পর্শেষ্বসক্তাত্মা বিন্দত্যাত্মনি যৎ সুখং । স ব্র-
হ্মযোগযুক্তাত্মা সুখমক্ষয়মশ্নুতে ॥ ২১ ॥ যে হি সংস্পর্শজা ভোগা দুঃখযোনয় এব তে । আদ্যন্তবন্তঃ কৌন্তেয় ন তেষু রমতে বুধঃ ॥ ২২ ॥

নিবৃত্তমোহঃ ॥ ২০ ॥ মোহনিবৃত্ত্যা ব্রহ্মণি স্থিতিমেবাহ বাহ্যেতি । ইন্দ্রিয়ৈঃ স্পৃশ্যন্ত ইতি স্পর্শাঃ । বাহ্যস্পর্শেষু বাহ্যেন্দ্রিয়বিষয়েষ্বসক্তাত্মা অনাসক্তচিত্তঃ আত্মনি অন্তঃকরণে যদুপশমাত্মকং
সাত্ত্বিকং সুখং তদ্বিন্দতি লভতে । স চোপশমসুখং লব্ধ্বা ব্রহ্মণি যোগেন সমাধিনা যুক্তঃ তদৈক্যং প্রাপ্ত আত্মা যস্য সঃ । অক্ষয়ং সুখং প্রাপ্নোতি ॥ ২১ ॥ ননু প্রিয়বিষয়ভোগানামপি নিবৃত্তেঃ
কথং মোক্ষঃ পুরুষার্থঃ স্যাদিত্যত আহ যে হীতি । সংস্পর্শা বিষয়াস্তেভ্যো জায়ন্তে যে ভোগাঃ সুখানি তে হি বর্তমানকালেঽপি স্পর্ধাসূয়াদিব্যাপ্তত্বাদ্দুঃখযোনয় দুঃখকারণমেব আদ্যন্তবন্তঃ
অন্তবন্তশ্চ অতো বিবেকী তেষু ন রমতে ॥ ২২ ॥

তস্মান্মোক্ষপরস্য কৃত্যমাহ : তচ্চ কামক্রোধবেগো বিপ্রত্তিপক্ষং অতস্তৎসহনসমর্থপরমোক্ষভাগীত্যাহ শক্নোতীতি : কামাৎ ক্রোধাচ্চোদ্ভবতীতি যো বেগঃ মনোনেত্রাদিক্ষোভলক্ষণঃ তমি
হৈব তত্তদ্রসময়ে যো নরঃ সোঢুং প্রতিসোঢুং শক্নোতি তদপি নক্ষণমাত্রং : কিন্তু শরীরবিমোক্ষণাৎ প্রাক্ যাবদ্দেহপাতমিত্যর্থঃ : স এব নরস্তু সঃ যুক্তঃ সমাহিতঃ স সুখী চ ভবতি : না
ন্যঃ : যদ্বা মরণাদূর্ধ্বং বিলপন্তীভির্যুবতীভিরানীয়মানোপি : যথা প্রাণশূন্যঃ কামক্রোধবেগং সহতে তথা মরণাৎ প্রাগপি জীবন্নেব যঃ সহতে স এব যুক্তঃ স সুখী চেত্যর্থঃ : তদুক্তং
সন্তোষেন : প্রাণগতে যথা দেহঃ সুখং দুঃখং ন বিন্দতি : তথা চেৎ প্রাণযুক্তোপি স কৈবল্যাশ্রমে বসেদিতি ॥ ২৩ ॥ নৈকেবলং কামক্রোধবেগসহনমাত্রতঃ মোক্ষং প্রাপ্নোতি : অপি তু যো

শ্রী ২৭

শক্নোতীহৈব যঃ সোঢুং প্রাক্শরীরবিমোক্ষণাৎ ॥ কামক্রোধোদ্ভবং বেগং স যুক্তঃ স সুখী নরঃ ॥ ২৩ ॥ যোऽন্তঃসুখোऽন্তরারামস্
তথান্তর্জ্যোতিরেব যঃ । স যোগী ব্রহ্মনির্বাণং ব্রহ্মভূতোऽধিগচ্ছতি ॥ ২৪ ॥ লভন্তে ব্রহ্মনির্বাণমৃষয়ঃ ক্ষীণকল্মষাঃ । ছিন্নদ্বৈধা য
তাত্মানঃ সর্বভূতহিতে রতাঃ ॥ ২৫ ॥ কামক্রোধবিযুক্তানাং যতীনাং যতচেতসাং ॥ অভিতো ব্রহ্মনির্বাণং বর্ত্ততে বিদিতাত্মনাং ॥ ২৬ ॥

যোऽন্তরিতি : অন্তরাত্মন্যেব সুখং যস্য : ন বিষয়েষু অন্তরেবারামঃ ক্রীড়া যস্য ন বহিঃ : অন্তরেবাজ্যোতির্দৃষ্টির্যস্য ন গীতনৃত্যাদিষু : স এব ব্রহ্মভূতঃ সন্ ব্রহ্মনির্বাণং মোক্ষং প্রাপ্নোতি ॥ ২৪ ॥
কিঞ্চ লভন্ত ইতি : ঋষয়ঃ সম্যগ্দর্শিনঃ : ক্ষীণং কল্মষং যেষাং : ছিন্নং দ্বৈধং সংশয়ো যেষাং : যতঃ সংযতঃ আত্মা চিত্তং যেষাং সর্বেষাং ভূতানাং হিতে রতাঃ কৃপালবঃ তে ব্রহ্মনির্বাণং মোক্ষং লভন্তে ॥ ২৫ ॥
কিঞ্চ কামক্রোধবিযুক্তানামিতি : কামক্রোধাভ্যাং হি যুক্তানাং সংন্যাসিনাং যতচিত্তানাং জ্ঞাতাত্মতত্ত্বানাং অভিতঃ উভয়তঃ মৃতানাং জীবিতানাঞ্চ নাদেহান্তরে এব তেষাং ব্রহ্মনির্বাণং নিবৃত্তিঃ : অপি তু
জীবিতানামপি বর্ত্তত ইত্যর্থঃ ॥ ২৬ ॥